Shri Raghunatha Temple MSS. Library,
JAMMU

No. ५५६८ - घ

Title ज्ञानतन्त्रस्य द्वितीयं पटलम्

Author तोतकौल

Extent १०४ Age १६४०

Subject तन्त्रम् . संपूर्णम्

नं० ५५६८ -घ/ग

ज्ञानतंत्रस्य द्वितीयपटला

पत्राणि

नं० ११२२

१९।

5578

F – 104

Complete

Sharma

नं.
२२१२ – क
[illegible]
१०४ – [illegible]
[illegible]
[illegible] – [illegible]

श्री॰
१

ॐश्रीगणेशायनमः ॐनमःपरमदेवतायै ॐकुलदीपि
कायै ॐकुलधर्ममनादृत्यपशुशास्त्राणियोऽभ्यसेत् स्व
गृहे पायसंत्यक्त्वाभिक्षामटतिदुर्मतिः १ विहायकुलध
र्मंयःपशुधर्मेरतोभवेत् तडागादिवत्स्मार्तोस्मगात्संसा
सथावत्ति २ नापिलोभान्नचक्रोधान्नहिद्वेषान्नमत्सरात्
नकामान्नभयाद्वापिकुलधर्मंपरित्यजेत् ३ चतुर्वेदीकु

लाक्षानीश्वपचादयमःप्रिये श्वपचोपिकुलक्षानीब्राह्म
णादतिरिच्यते ५ प्रहत्तेभैरवीचक्रेसर्वैवर्णाद्विजातयः
निहत्तेभैरवीचक्रेसर्वैवर्णाःपृथक्पृथक् श्रामिषासव
सौरभ्यहीनंयस्यस्यात्तंभवेत् प्रायश्चित्तीसवर्ज्यश्चपशु
रेवनसंशयः ८ उक्तमानित्यपूजास्यामेध्यमंपूर्वपूजने
मासपूजाधमादेविमासाद्ध्वेपशुर्भवेत् ७ कामाख्या

श्री.
२

2

तत्त्वे पञ्चतत्त्वेन देवेशि महापातकराशयः नश्यन्ति तत्क्षणे
नैव तूलराशिमिवानलः ८ यत्रैव पञ्चतत्त्वानि तत्र देवी
वसेद्ध्रुवं पञ्चतत्त्वविहीने तु विमुखी जगदम्बिका ९ ज
म्बूद्वीपे कलौ देवि ब्राह्मणो हि विशेषतः पशुर्न स्यात्पशु
र्न स्यात्पशुर्न स्याच्छिवाज्ञया १० नानुकल्पः कलौ दुर्गे नानु
कल्पः कलौ युगे न सन्देहो न सन्देहो न सन्देहः कलौ युगे ११

शिलायांसस्यवापश्चनभवेदङ्कुरोयथा अनाहुत्यौदितो
देविकर्षणञ्चयथानहि १२ ऋतेविनास्त्रियोदेविजनोऽ
पत्यंप्रजायते गमनञ्चविनादेविस्थानप्राप्तिर्यथानच
१३ अतोदेव्याःसायनंचपञ्चतत्त्वंविनाहुथ्या कालीतारा
मन्त्रंप्राप्यवीराचारंकरोतिन १४ शूद्रत्वंनच्छरीरेनप्राप्तं
तेननचान्यथा हन्त्रियोपितथादेविवैप्रपञ्चाण्डालतो

व्रजेत् १५ सूद्रस्यसूकरत्वंचयातियातिनसंशयः नसारः
कदलीवृक्षोवंशादण्डेयथाप्रिय १६ दर्शनेननयामुक्तिर्ना
स्तिनास्तिनयाप्रिये कुलोड्डीशे पूजाकालेविनानैवपश्ये
च्छक्तिंदिगम्बरां १७ आयुषाहीयतेदृष्ट्वापीत्वाचनरकंव्रजे
त् सौत्रामण्यांकुलाचारेब्राह्मणःप्रपिबेत्सुरां १८ अन्यत्र
कामतःपीत्वाप्राप्यश्चित्तीयतेध्रुवं तडक्के रुद्रयामले सप्ते

क्रमाच्चतुर्वर्णैः क्षीराज्यमधुपिष्टकैः १९ तेनायां पूजिता
देवीह्यतेन सर्वजातिभिः मद्युभिः सर्ववर्णैश्च पूजयेहापर
ेयुगे २० पूजनीया कलौ देवी केवलैरासवैश्च तैः कुला
ष्टनेव सौत्रामण्यां कुलाचारे ब्राह्मणः प्रपिबेत्सुरां २१ अ
न्यत्र कामतः पीत्वा प्रायश्चित्तीयते ध्रुवं अत्रापि संशयो ना
स्ति उड्डीशोत्तरखंडे किन्तु वत्सदिना हेतुं चेतः कस्मात्प्रसी

श्री॰
ध

५

इति २२ अन्नः शुद्धिर्मनः शुद्धिर्हे तस्मान्माकथं भवेत् सुराहेतुः
कारणञ्च परमामृतमेवच २३ ज्ञानदा शुभदा तीर्थं मदिरा
मोदिनी सती कुलदा कुलगंगा च पावनी तारिणीति च २४
ममनामानि गोप्यानि जानीहि कुलनंदन तत्स्वरूपां मदो
न्मत्तां मदिरां शंख भूषणां २५ ध्यायेत्प्रीति मुखं वीस्मरेस्तु द
तीं शुभदां शुभं लोचनेनो भिवीक्षेथाः सदा शान्तेन चेतसा २६

त्तानदाचमहेःशान्तिसमाश्रेयायुगेयुगे हेतुशून्याःक्रिया
नष्टानातःशुद्धिर्नवाहितं २७ देहंहय्येवजानीहिवत्सम
न्त्रसाधनंविना साधनंचव्यर्थायन्त्रहेतुवादंविनाशय २८
यन्त्रकेवलजापेनासिद्धिःस्यादितिनिश्चितं तस्माज्जपम
हादेवमोदिनीमुदितःसदा २९ ब्रह्महत्यादिपापानिज
न्मजन्मकृतान्यपि नश्यन्तिबिन्दुमात्रेणतारिणीरसना

स्त्री॰
५

गता ३॰ ऐश्वर्यादिलक्ताक्ष्मजारतिपूजाचमुक्तिदा वीराणांमा
धनंकामंसिद्धयेभावनाजपः ३१ नभावेनविनासिद्धिर्न
भावेनविनाजपः नभावेनविनाहेतुःसर्वंभावप्रतिष्ठितं
३२ अतस्त्वनारिणीवत्समममतेजःस्वरूपिणी जानीहिभ
क्तिसंयुक्तामाश्रयविधानतः स्वधर्मसेवनाद्वत्सनै
तेदोषाभवंतिहि अन्येचबहवोदोषानश्यन्तियुक्तियो

गतः ३४ शापाश्चज्वलचिन्ताभ्रान्त्यादीनामिहोदिताः
मन्त्रेणचसमुद्धृत्यममपूजापरोभव ३५ ममस्वरूपो
सौदेवीपवित्रांविद्धिसर्वदा तयाचिनामनोनित्यंमा
लिन्यंनपरित्यजेत् ३८ परित्यक्तेचमालिन्येमनोदेहे
स्वरूपभाक् अतःस्रोतसमाश्रित्यसाधनेऽरूपतः
३७ अप्रकाशंशरूपनमंसहादेसर्वविशोधनं प्रकाशनो

श्री·
८
6

निन्दन्ते वा प्रकटं क्रियन्तेऽथवा ३८ ऊलं तस्य नाशाय यामि
नद्दर्कं प्रीयन्ते गणैः प्रतउक्त रक्षण्डीये विरम त्वं महेश्व
र ३९ ऊल प्रकाशो नाशाय यस्मिज्जये परिगोपनं एवमे
वं विलोक्यैवं भवशांतोऽ च भैरव ४० श्री शिव उवाच
प्रणतोस्मि महाकालि रूपया वदसूचितं येन धोन्नाऽ
मयादेवि विमुच्ये मोहितोल्पहं ४१ पापाण्डाहम्प्रकायेस्तु

त्वत्तनाहंप्रकाशवान् भविष्यामिनपाखण्डोमहापाख
ण्डत्वेण्डिनि नविनाश्रद्धयासिद्धिर्नविनाश्रद्धयामन्त्रः
नविनाश्रद्धयापूजाश्रद्धाहीनोऽश्रद्धोभवेत् ॥३॥ श्रद्धांवि
नाभ्रमोनैवहरीभवतिशङ्कर भ्रमखण्डेरहंहरेनस्मा
त्श्रद्धान्वितोभव ॥४॥ महाचीनक्रमेणैववर्तेथाःसर्वदा
शिव स्थिरचित्तेनशान्तेनकर्तव्यंयमिनात्वया ॥५॥

श्री· ८

श्रादौकृत्वास्तंभनंततःशुद्धमतिमानसं कुलीनःसर्वदा
श्रेष्ठःसर्वयोगेश्वरेश्वरः ४८ श्रीश्यामोवाच वत्सगोप्यंगु
नगोप्यंगुनगोप्यंपुनःपुनः अगोपनात्सिद्धिहानिरित्ये
वंकथितंत्वयि ४७ शृणुभैरवमूलेहिज्ञानमेकंयथो
त्तरं श्रियंवीक्षन्स्मशानस्थप्रत्यक्षराघूर्णितलोचनः ४५
अनुद्विग्नमनावत्सकेवलंजपमाचर केवलंमात्रहूपे

णांतोपभ्रुपेत्यपरिनन्दितः ४९ जपोहिसर्वज्ञानानामह
मेवनसंशयः योनितन्त्रे मैथुनेनविनामुक्तिर्नैनिश्चा
स्त्रसनिर्णयः ५० श्रुतिस्मृतिपुराणानिकृतानिविवि
थानिच पशूनांतुहितार्थायषण्मुखप्राणवल्लभे ५१
परमानन्दरूपेणभजेद्योनिंसमुज्ज्वलां विशेषतःकलि
युगेयोनिरूपांजगन्मयीं ५२ योभजेत्परयाशक्त्यातस्य

श्री॰
८

मुक्तिः करे स्थिता दक्षिणानाशिखीसिद्धिर्नैवचीनक्रमंविना ५३
स्वस्मिन्मंत्रेयथाचारः सएवपरमोमतः फलहानिस्त्वविश्वा
सात्तस्माद्भावपरोभवेत् ५४ यदत्रलिखितंदेवितन्त्रेचयो
निसंज्ञिके तत्सर्वंसाधकानांचकर्तव्यंभावमिच्छता ५५
शृणुध्वंपरयाभक्त्यासावधानावधारय यस्मैकस्मैनवात
व्यंप्राणान्तेचनसंशयः स्वयोनिरिवदेवेशिगोपनीयास

दाप्रिये नगरछन्ने प्रवक्ष्यामि सत्यं सत्यं हि निश्चितं यस्या
नुष्ठानमात्रेण भवाब्धौ न निमज्जति योनिरूपा महामा
यालिंगरूपः सदाशिवः ५८ तेन स्नानार्पणेन तन्मध्ये मां
मैश्च सुन्दरि योन्यां लिङ्गं समाविश्य शाङ्करं सर्वं समर्पये
त् ५९ नवेन नैवेद्ये देवी भगरूपां जगन्मयीं प्रत्यावाते
नदेवेशा ब्रह्महत्याव्यपोहति नाल्पपुण्यवतां दुर्गे विश्वा

श्री॰
५

सोऽजायतेध्रुवं सर्वसाधनमध्येन्तुयोनिसाधनमुत्तमं भु
क्त्वापीत्वावदेवेशियदियोनिंप्रपूजयेत् कोटिजन्मार्जि
तंपापंतत्क्षणादेवनश्यति भोगेनलभतेमोक्षंभोगेनल
भतेसुखं तस्मात्सर्वप्रयत्नेनसाधकोभोगवान्भवेत् यो
निनिन्दांघृणांलज्जांमतिमात्वर्जयेत्सदा कुलाचारप्रसंगे
नयदियोनिंनपूजयेत् किंतस्यसाधनैर्लक्षैः सर्वंतस्य

हथाभवेत् योनिदर्शनमात्रेणमुक्तःकोटिकुलैःसह
चन्द्रसूर्योपरागेचयदियोनिम्प्रपूजयेत् तर्पणंयोनि
तत्वेनपुनर्जन्मनविद्यते योनिमूलेवसेद्देवीयोन्याञ्च
नगनन्दिनी कालीतारायोनिचक्रेकुन्तलेछिन्नमस्त
का भावहृद्रामणौ पीयतेखाद्यतेयद्यत्तत्सर्वेकुण्डली
मुखे हुत्वासिद्धिमवाप्नोतिनचबंधेनबध्यते भिक्षा

श्री
१०

10

कार्यं न च स्वार्थं कुंडलिन्याः कृते प्रिये ॥ हे मातर्देहि मे भिक्षां
कुंडलीं तर्पयाम्यहं ॥ अवधूता श्रमे स्थित्वा भैरवानन्द तत्परः
भैरवोऽहं न चान्योऽस्मि न देवो मत्परः क्वचित् ॥ तत्त्वमन्त्रा
र्चनं सर्वं मयि जानन्तेन चान्यथा ॥ शिवोऽहं भैरवानन्द मन्त्रो
ऽहं कुलनायकः ॥ रक्तचन्दनदिग्धांगो रक्तकौपीनभूषितः
रक्तमाल्याम्बरधरो हेतुयुक्तः सदा भवेत् ॥ एवं भिक्षाट

नभिन्नभैरवाचारतत्परः हीयतेनचपापेनवर्द्धतेन
चमायया आत्मनंभावयेन्मन्त्रीदेवीरूपःकुलेश्वरः न
पूजानापिसन्ध्यापिनतिष्ठानव्रतादिकं पूर्णोहंभैर
वश्चाहंनित्यानन्दोहमव्ययः स्रगंधिपुष्पमालाभिर्नु
कालङ्कारभूषणः नान्यस्मादधिकोदेवइतिचिन्तापरा
यणः भुक्त्वाचमार्दकंद्रव्यंभवेत्कुलपरायणः साधके

श्री
११

ह्रोभमापद्रेममह्रोमः प्रजायते तस्माद्यत्नाह्नोगयुक्तो
भवेद्वीरवरः सुधीः भोगेन मोक्षमाप्नोति भोगेन कुलसा
धनं यद्यद्वदति तिष्ठाति यत्करोति यदर्चेति तत्सर्वं कुल
रूपञ्च ध्यात्वा चविहरेत्सुधीः एकाकी निर्जने देशे श्म
शाने पर्वते वने शून्यागारे नदीतीरे निःशङ्को विहरेत्सु
दा वीराणांजपकालस्तु सर्वकालः प्रशस्यते सर्वदेशे

सर्वपीठे कर्तव्यं नात्र संशयः यदि विघ्नो भवेद्दुष्टः कुल
द्रव्य परायणः सर्वदा पूजयेद्देवीमस्नातः कृतभोजनः
उद्याने वा विविक्ते वा कर्तव्यं कुलतो षणं द्विधे वीरेन भेदो
स्त्रियो भेदः सत्व कथ्यते शान्तो विनीतो मधुरः कलाला
वण्य संयुतः दिव्यस्तु देवता प्रायो वीरश्चो इतमानसः
विभूति भूषणो वापि चन्दनाद्यैर्विलेपितः रक्तचन्दनदि

श्री॰
१२
12

यंगोवैसवोवाप्यवैस्नवः शाकरगोपनोवापिव्यक्तोवा
ऊलभैरवः असंस्कृतःकेशजालःसंस्कृतोवाऊलेश्वरः
क्वचिच्छिष्टःक्वचिन्नष्टःक्वचिद्भूतपिशाचवत् अपमाने
चपूजायांतुष्टःपुष्टःसदाभवेत् बालोवायौवनोन्मत्तो
हृद्धोवाहृन्दरीन्नथा ऊस्थितोवामहाडम्बेनमस्कृत्यावि
भावयेत् उड्डीशोत्तरखण्डे नातःपरतरंज्ञानंत्रिभुलोके

श्रूयते येकमेवपरंज्ञानंवत्सतन्नारिणीविना कदा
चित्रोपपद्यतेननःसामर्वयोगिनी संगोप्ययदिवत्स
त्वंक्रियामेवंकरिष्यसि श्वपमेवकालेनतदाइव
सिशंकर नवक्तव्यंकदाचन गोपनीयं २ प्रयत्नतः
ममपूजापरोभूत्वाशय्यायांशक्तिसंयुतः परमानन्द
रूपेणजपन्निस्यंदिगम्बर मयोक्तंसत्यमेवैतद्धत्सम्

श्री॰
१३
13

एतद्दिगम्बर जपात्सिद्धिः ३ नैसंशयः
तस्माद्देहेनभावेनजपराद्विन्दिवंशिव श्रवष्पंममद्रूप
सद्दर्शकस्त्वंसदाशिव श्रीमदाचारमारजन्ने स्नानादिमा
नसंशौचंमानसप्रभवोजपः पूजाचमानसन्दिव्यंमान
संतर्पणादिकं सर्वंदैवप्रभः कालोनाशुभोविद्यतेक्वचि
त् नविशेषोदिवारात्रौनसन्ध्यायान्महानिशि वस्त्रा

सनस्थानगेहदेहस्पर्शादिवारिणः शुद्धिंनचाचरेदत्र
निर्विकल्पमनश्चरेत् नात्रशुद्ध्यायपेक्षास्तिनचामेध्या
दिदूषणं सर्वदापूजयेद्देवीमस्नातःकृतभोजनः म
हानिशिशुचौदेशेबलिंमन्त्रेणदापयेत् येषांचित्तेभा
ग्यवशात्कुलज्ञानंप्रकाशयते तेवन्द्यास्तेमहात्मानस्ते
कृतार्थानरोत्तमाः एषामुत्पद्यतेचित्तेकुलज्ञानंमपो

श्री॰
१४

14

दितं ज्ञासिनाहिमयापूर्वंपशुपवःशास्त्रमोहिताः कलयमे
नजानन्तितत्तोज्ञानाभिमानिनः पशुशास्त्राणिसर्वाणिम
येवकथितानिच मूर्त्तेनरेणमन्त्रेणमोहनायदुरात्मनो
महापापवशान्नृणांतेषुवांछाभिजायते तेषांहिसद्गति
र्नास्तिकल्पकोटिशतैरपि योनिमण्डलमासाद्यमूलवि
द्यांजपेत्तुयः षण्मासैःसिद्धिमाप्नोतिविनाहोमार्चना

द्भिः यदिभाग्यवशाद्देवियोनिमुद्राविलोकिता प्रण

म्यदण्डवद्भूमौमनसाजपमाचरेत् भगरूपामहादेवी

योगिनीयोनिरूपिणी तस्मायत्नेनमन्त्रज्ञोमहामुद्रां

समर्पयेत् योनौतिष्ठन्तिसर्वंचमत्स्यमांसेनयामध्य ॐ

लक्ष्याणिचैतानिभक्षयेत्कुलकौलिकः संस्पृश्यवामे

कुलजांकुलपूजारतोभवेत् देयंतस्यैपानमर्घ्यंखाद्यंत

स्त्री॰
१५
15

न्मखतः प्रिये प्रविश्यपयोनिमंत्रञ्चजपेन्मन्त्रमनन्यधीः आ
त्मानंभैरवंमत्वायोनिंभगवतीन्तथा भैरवाचारसम्पन्नः
प्रवियोनिमण्डले याशक्तिःसामहादेवीकेवलानन्दरूपिणी
तयोनौचनरःसिद्धःसाधकोवीरवल्लभः इतिज्ञात्वाजपेद्वि
द्यांकेवलंभावनत्परः जातिसम्बन्धबुद्धिःस्यान्नकदापिच
साधकः जातिसम्बंधतोदेविनरकंप्रतिपद्यते उच्छिष्टंभ

त्यजेन्नस्त्रीणांदद्यान्नोच्छिष्टमेवहि शक्त्युच्छिष्टंपिबेद्द्रव्यं
शिवोच्छिष्टञ्चचर्वणं शक्तिवीरप्रसादेनकिंनसिद्ध्यति
भूतले योनितन्त्रे शक्तिमन्त्रपरस्तुयोवैयोनिप्र
पूजकः सधन्यःसकविर्धीमान्सर्वज्ञोपिस्वरास्वरैः ब्र
ह्मायदिचतुर्वक्त्रैःकल्पकोटिशतैरपि नदावक्तुंनश
क्नोतिकिमन्यैर्बहुभाषिभिः यदिभाग्यवशेनैवसप्त

श्री·
१८
16

ण्यां योनिमाप्नुयात् तद्दैवमहतीं पूजां कृत्वा मोक्षमवाप्नु
यात् स्थानीयप्रमदां कान्तां तृष्णालज्जादिविवर्जितां स्वका
न्तां परमाकान्तां वासुदेवांशां स्थाप्य मण्डले प्रथमे विजया
न्त्वा पूजयेद्भक्तिभावतः वामोरूपरि संस्थाप्य यजोद्यो
निं सकुन्तलां योनिगर्तै चन्दनञ्च दद्यात्सुष्टं मनोहरं त
त्र चावाहनं नास्ति जीवन्यासं तथा मनुः तत्सुखे कारण

त्वासिन्दूरेणार्द्धचन्द्रकं ललाटेचन्दनन्दत्वाहस्तद्व
न्द्वेकुचोपरि अष्टोत्तरशतंजप्त्वातन्मध्येचवरानने कु
चयोर्मर्दनंकुर्याद्गण्डचुम्बनपूर्वकं अष्टोत्तरशतंवा
पिसहस्रंयोनिमण्डले जप्त्वाचमन्त्रंस्तोत्रंचपठेद्भक्ति
समन्वितः योनिदर्शनमात्रेणतीर्थकोटिफलंलभेत्
रजस्वलाभगान्दृष्ट्वास्पृष्ट्वाचसाधकःस्वयं अष्टोत्तरश

श्री॰
१८

नेजस्याभवेद्भमिपुरन्दरः परयोनौजपेन्मंत्रंसर्वकालेच
सर्वदा देवीत्तुच्यायजेद्देवीपापंस्यात्शक्तिरूपिणी थ
र्मार्थकाममोक्षार्थीचतुर्वर्गफलंलभेत् भोगीनैवतुयो
गीस्याद्योगीनैवतुभोगवान् भोगमोक्षात्मकःकौलोय
दियोनिंप्रपूजयेत् योनिपूजाविनादुर्गेसर्वपूजाहथा
भवेत् योनिमध्येप्रधानाहिचाण्डालगणनायिका त

स्याः पूजनमात्रेणममतल्पोनसंशयः पापाशामैषु
नेयस्यच्छणास्याद्भक्तेरेतसोः पानेभ्रांतिर्भवेद्यस्यभेद
बुद्धिश्चसाधने शक्तिमंत्रंपरस्तत्पसङशात्माकर्थंजपे
त् तत्रतिष्ठेत्साधकेन्द्रः शक्त्याद्युक्तोमहेश्वरः महाशं
खेनदेवेशिसर्वकार्यंजपादिकं पञ्चतत्वंविनादेविय
त्किञ्चित्कुरुतेनरः तत्सर्वंनिष्फलंतस्यअन्तेनरकमा

श्री॰
१८
18

ब्रुयात् महाविद्यामहत्वसेवयदियोनिंनपूजयेत् पुरश्च
र्यांशतेनापितस्यमन्त्रोनसिद्ध्यति पुष्पांजलित्रयंदत्वा
योनिगर्तेमहेश्वरि जन्मान्तरसहस्राणांपूजातस्यप्रजा
यते गुरुरेवाशिवःसाक्षात्तत्पत्नीतत्स्वरूपिणी तस्यार
मणमात्रेणकौलिकोनारकीभवेत् सर्वसाधारणीयो
निंमर्दयेत्साधकोत्तमः श्रीपार्वत्युवाच विधिनाकेन

सृष्टासायोनिरूपाजगन्मयी श्रीशिवउवाच तयालिङ्गं
सम्पूज्यपूजयेत्तुक्तिरूपिणीं भगरूपामहामायालि
ङ्गरूपीसदाशिवः तयोःपूजनमात्रेणजीवन्मुक्तोनसंश
यः पुष्पादिकंबलिंचैवसमग्रमवानत्थैवच यदिनैवत
दाडर्गेकारणेनप्रपूजयेत् मन्त्रुनाकेवलेनापितदायो
निंप्रपूजयेत् प्राणायामंयोनिगर्तेषडङ्गंमन्त्रुनाप्रिये

श्री.
१५
19

योनिमूलेस्थितंजप्त्वालिंगेयोनिंप्रमार्जयेत् सर्वेषामाय
नानांचसत्ववमंपरिकीर्तितं एतत्तंत्रंचदेवेशिनप्रकाशं
कदाचन नदेयंपरशिष्येभ्योशिष्येभ्योपिविशेषतः स्वा
नकालेचदेवेशियदियोनिंनिरीक्षयेत् सफलंजीवनंत
स्यसाधकस्यसुनिश्चितं पश्चाद्दियोनिमात्रंतुसभावेचप्र
पूजयेत् योनिपूजनमात्रेणसाक्षात्सिद्धिर्नसंशयः स्वर्गे

मर्त्यैश्चपातलेसंपूज्योसौसुरासुरैः योनितत्वंसमाख्या
यसंग्रामेप्रविशेद्यदि जित्वारणेवदेवेशिविजयीसन
संशयः किंगंगास्नानमात्रेणकिंवातीर्थादिसेवनात्
नास्तियोनिसमाभक्तिपोत्यासर्वैहथाभवेत् पंचव
क्त्रैश्चदेवेशियोनिमाहात्म्यमेवच तदावक्तुंनशक्नोति
षण्मुखनगनंदिनि नवयोनिप्रसादेनमहादेवत्वमा

श्री॰
२॰
20

गतः नवीनऊन्नलायोनिर्मईयेयोह्रिसाथकः समुक्तस्थ
महाडःखोह्योरसंसारसागरात् किंगंगास्नानमात्रेणाकि
म्बातीर्थादिसेवनात् पूज्यनेसाथकेंद्रेणभगाद्गपासदाश्रि
ये बद्धनात्राकिमुक्तेनश्रृणश्चकमलाननने पूजनेसाथका
नाञ्चसर्वसाधारणंश्रिये पञ्चनत्वंविनादेविचतुर्थंनि
ष्फलंभवेत् शान्तुछिष्टंपिवेद्द्रव्यंवीरेणसहचर्वणं प

वंकृत्वामहायोनिंपूजयित्वादिवानिशि भुक्तापीत्वाम
हेशानिविहरेन्नहितिमण्डले विष्टप्यन्तुलसीमालांऊ
र्ध्वहरिमन्दिरं कथोपकथनन्देविश्रीहरेर्गुणकीर्त
नं हरिनाम्नाजानभावोविहरेत्पञ्चसन्निधौ गमाश्रमत
रापूजाप्रकटाज्ञानिरेवच एवंपूजानकर्त्तव्यापशोरये
वपार्वति पुष्पाञ्जलित्रयंदत्वायदियोनिंप्रपूजयेत्

श्री·
२१
21

तस्मात्तस्मानि कर्माणि न सन्ति भुवनत्रये सर्वेषामन्नमा
श्रित्यभोजनं चामरनात्मकं मैथुनञ्च महेशानि सर्वयो
नौप्रशस्यते सदानन्दमयो ऽर्गोवीरश्चापिविराजते त
त्सायनमहं वक्ष्ये सर्वं सर्वज्ञसायनं स्नानादिमानसः
शौचं मानसः प्रभवो जपः पूजं च मानसन्दिव्यं मानस
न्तर्पणादिकं सर्वप्रवस्त्रभः कालो नास्त्रभो विद्यते क्वचि

त् नविशेषो दिवारात्रौ न संध्यायां महानिशि वस्त्रासनस्ना
नगेहदेहस्पर्शादिकेष्वपि शुद्धिं न चाचरेत्तत्र निर्विकल्पम
नश्चरेत् दिक्कालनियमो नास्ति स्थित्यादिनियमस्तथा न
जपे कालनियमो नार्चादिष्व बलिष्वपि स्त्रीद्वेषो नैव कर्त
व्यो विशेषात्पूजनं स्त्रियः स्त्रियं गच्छन्स्पृशन्पश्यन्यत्र कुत्रा
पि साधकः दत्वा भक्ष्यं जपेन्मन्त्रं भक्ष्यद्रव्यं यथारुचि स्वेच्छा

श्री·
२२
22

यानियमःप्रोक्तोवीरसाधनकर्मणि। स्त्रियोदेवाःस्त्रियःप्राणाः
स्त्रियएवविभूषणम्। स्त्रीसङ्गिनासदाभाव्यमन्यथास्वस्त्रिया
मपि। यदुक्तंभावसर्वस्वेसर्वंतन्त्रेषुगोपितं। द्रव्यभक्षणका
लेतुआदौशाक्तेभ्योनिवेदयेत्। अथवाप्रथमंभागंनिक्षिप्यजल
मध्यतः। श्मशानेप्रान्तरेगत्वाशक्त्यायुक्तस्तुसाधकः। भुक्त्वा
द्रव्यंजपेन्मन्त्रंजप्त्वामैथुनमाचरेत्। किंदिव्यसाधनैर्लक्षैःकि

स्नातस्त्वादिमेवनैः किंपूजाध्यानलक्षैश्च किंदानैस्तपसा

पिव भगं विनामहेशानि सर्वं त्वेव वृथा भवेत् योनिपू

जनमात्रेण सर्वसाधनभाग्भवेत् तर्पणं योनितत्त्वस्यापि

नरः स्वर्गगामिनः लालयेत्त्वं सदा योनिं ॐ त्रलाकर्षणादि

ना कोऽडेक्कृत्वा महेशानि वामभवं ऊरुनेयदि तदाजन्मजि

नःपापैर्मुक्तः कोटिकुलैः सह शिष्याणां कन्यकायोनिं व

स्त्री·
२३

23

श्रयोर्निविशेषतः केवलंभक्तिभावेनगन्धपुष्पैस्तु पूज
येत् इहलोकेसुखंभुक्त्वादेवीलोकेमहीयते पूजाकाले
चदेवेशियदिकोप्यत्रगच्छति दर्शयेद्वैस्तवीमुद्रांविस्तृत्या
सततथास्तवं योनिजन्तलमादाययदिराजगृहंव्रजेत् तस्य
कार्याणिसर्वाणिप्रलयन्तेनसंशयः ब्रह्मंब्लाश्चविस्त्रश्च
मुनयश्चामलाशयाः श्राब्रह्मस्तम्बपर्यन्तंयोनौसर्वप्रजा

यन्ते योनितत्त्वस्यमाहात्म्यंकोवेदभुवनत्रये मद्यमांसे
नथामत्स्यमुद्रामैथुनमेवच पंचतत्त्वंविनादेविसर्वंच
विफलंभवेत् यदिभाग्यवशेनैवकुलीनदर्शनंभवेत्
भक्ष्यभोज्यैश्चसंतोष्यप्रार्थयेद्धयत्नतः आगच्छसाय
कश्रेष्ठयोनिमज्जनतत्पर नवदर्शनमात्रेणाहकृतार्थोस्मि
नसंशयः पशुनासहसंलापःपशुसंसर्गएवच यदिदे

स्पी॰
२४

24

वान्सह्यादेवियोनिदर्शनन्तत्परः तिलकंयोनितत्वेनतदा
स्फुडोभविष्यति कुमारीपूजनंदुर्गैकुलीनभोजनन्तथा प्र
धानद्वयमेतस्मिग्रन्थेदेविसुनिश्चितं अंतःशाक्ताबहिः
शैवाःसभायांवैस्नवामताः नानामूर्त्तिधराःकौलाविचर
न्तिमहीतले जन्मान्तरसहस्त्रेषुयस्यवंशोप्रजायते कुली
नस्तत्कुलंज्ञेयंपवित्रंनगनत्दिति पादप्रक्षालनंयत्रकु

लीनः कुलतेयदि तस्यदेहङ्गेहञ्चधनन्तायोयप
यंते पशुहस्तेषुभानंचतत्सर्वंनिष्फलंभवेत् कुली
नस्यचमाहात्म्यंमयावक्तुंनशक्यते कुलीनश्चापि
सन्तोष्यमुक्तः कोटिकुलैः सह केवलंकुलयोगेनप्र
सीदामिनसंशयः चतुर्थाश्रमिणंदेविश्वपचंतान्त्र
मोमहान् तस्मात्हंकुलयोगेनमहादेवत्वमागतः

श्री॰
२५
25

आत्मयोनिविभेदेत्तयत्किञ्चित्सापकोत्तमः ऊर्म्मीपा
केष्ठपच्यन्नेयावदाहूतसंप्लवं शक्तिहूपायदादेवीवि
परीतरतायदि तदाकोटिकुलैःसार्द्धंजीवतञ्चसजीवि
तम् योनिक्षालनतोयेनलिङ्गःप्रक्षालनेनच पूजयि
त्वामहायोनिमर्च्चंदयाद्विधानतः ततोयंत्रविधिंकृ
त्वाभागंप्राक्कैपनिवेदयेत् भागद्वयतत्रयामन्त्रीकारणे

नव्यवाप्यितं मिश्रयित्वामहादेविपिवेत्साधकसत्तमः
ऊलार्धवेद्ब्रह्मासात्सलिलेविसृगन्येहृदयश्चतद्दसे
परमात्मानदानन्देनसमात्सेव्यामिमंप्रिये मांसाभावे
तलसहनेसार्द्धकंनागरन्तुवा श्चादायपूजयेद्देविना
न्यथ्यानिष्फलंभवेत् मत्स्यमांसादिहीनेनमद्येनापि
चतर्पयेत् नकुर्यामत्स्यमांसाभ्यांविनाद्रव्येणपूज

श्री॰
२८

२८

नें पिशितन्तिलमात्रन्तु तिलार्द्धमलिविन्दुना सहार्पणे

मात्रेण कोटियज्ञफलं लभेत् कुलपूजासमं नास्ति पुण्य

मन्यज्जगत्त्रये तस्माद्यः पूजयेद्देवं पाशुमुक्तिमुमुक्षोः स

भाजनः अनर्थानर्थ्य(?) पापानां त्वज्ञो गुरुभक्तो दृढव्रतः कु

लपूजारतो यस्तु स मे प्रियतमो भवेत् चतुर्णामपि व

र्णानामाश्रमाणामधीश्वरि पुंस्त्रीनपुंसकानाञ्च पू

जितास्त्वं सदाशिवे इहामुत्र फलं दद्यात्स्वजितास्तु वभूरि

व स्तु पूजितास्त्वं देवेशि दुःखदा जलपूरिव जलपूजावि

नादेवि करोत्येन तस्य दुर्मतिः सयाति नरकं घोरमेकविं

शतिभिः कुलैः तस्मात्सर्वप्रयत्नेन जलपूजारतो भवेत्

लभते सर्वसिद्धीश्च नात्र कार्या विचारणा महाषोडशदा

नानि कृत्वा च यत्फलं लभेत् तत्फलं समवाप्नोति कृत्वा

श्री०
२७
27

श्रीचक्रदर्शने सार्द्धत्रिकोटितीर्थेषु स्नात्वा यत्फलमाप्नुयात्
तत्फलं लभते मर्त्यः कृत्वा श्रीचक्रदर्शनं बहुनोक्तेन किं देवि
यथा भक्त्या ददाति यः कुलवीर्याय पूजार्थं कुलद्रव्यं सयथेविव
त् समर्पयन्ति ये भक्त्या वाचा वा करणेभ्योऽपि शिला समर्वे उत्पादय
न्ति चानन्दं मन्त्रिया: कौलिकाश्चते आवयोः परमाकारं स
च्चिदानन्दलक्षणं कुलद्रव्योपभोगेन परिस्फुरति नान्यथा

अन्तःस्थानुभवोल्लासोमनोवाचामगोचरः कुलद्रव्योप
भोगेनजायतेनान्यथाप्रिये सेवितेचकुलद्रव्येकुलतत्त्वार्थ
दर्शिनः जायन्तेभैरवावेशाःसर्वत्रसमदर्शिनः तमःप
रिहृतंवेश्मयथादीपेनदृश्यते तथामायावृतोह्यात्माद्र
व्यपानेनदृश्यते मन्त्रपूतंकुलद्रव्यंगुरुदेवार्पितंप्रिये
येपिबन्तिजनास्तेषांस्तन्यपानंनविद्यते मद्यन्तुभैरवोदे

श्री·
२८
28

वोमदः शक्तिः समीरिता प्रहोमुक्तं न तद्भयं मोहयेत्त्रिदशा
नपि तन्मैरेयं शिवपीत्वा योगा — यतेनरः सज्ञानैक
परोभूत्वा समुक्तः स च कौलिकः सुरा शक्तिः शिवो मांसं त
द्भोक्ता भैरवः स्वयं तयोरैक्ये समुत्पन्ने य आनन्दो मोक्ष उच्यते
आनन्दो ब्रह्मणो रूपं तत्तद्देहे व्यवस्थितं तस्याभिव्यञ्जकं
मद्यं योगिभिस्तेन पीयते निःशङ्को निर्भयो धीरो निर्द्वन्द्वो

निष्कुतूहलः निर्मितवेदशास्त्रार्थो वरदां वारुणीं पिवेत्
मन्त्रसंस्कारसंशुद्धामृतपानेन सुन्दरि जायते देवताभावो
भवबन्धविमोचकः ब्राह्मणस्य सदायेयं क्षत्रियस्य रणागमे
गोलम्भने तु वैश्यस्य शूद्रस्यान्त्येष्टिकर्मणि देवान् पितॄन् सम
भ्यर्च्य देवि शास्त्रोक्तवर्त्मना गुरुं स्मरन् पिवन् मद्यं खादन् मांसं
न दोषभाक् तस्यार्थे सर्वदेवानां ब्रह्मज्ञानार्थमेव च सेवे

श्री० २९ 29

नमद्यमांसानिरसयाचेन्मपानकी मन्त्रार्थस्फुरणार्थायमनसः स्थैर्यहेतवे भवपाशनिवृत्त्यर्थं मद्यपानं समाचरेत् सेवते यः स्वार्थाय मद्यादीनि सपानकी प्राशये हेवताप्रीत्येच्छाभिलाषविवर्जितः अपश्चाभैरवं देवमकृत्वा मन्त्रतर्पणं पशुपानविधौ पीत्वा वीरोपि नरकं व्रजेत् मद्यप्रद्धमसम्भूतमासवं तण्डुलोद्भवं यस्यानन्दं निर्विकारमामोदञ्चमनो

हरं श्रमनन्तहृदयन्देवि देवताप्रीतिकारकं तङ्गत्यक्त्वा

गामात्रेणाशनकृतफललभेत् तस्य सम्यर्कमात्रेणानी

र्थकोटिफलंलभेत् देविनस्मानतः साक्षाल्लभेन्मुक्तिंच

त्रिविधां इच्छाशक्तिः सरामोदेज्ञानशक्तिस्तनद्वसे तत्त्वा

दौचक्रियाशक्तिस्तडुल्लासेपराख्यिता पितृदेवादियज्ञे

षवेदेहिंसाविधीयते आत्मार्थप्राणिनां हिंसाकदाचि

श्री॰
रु॰
30

त्रोदिताक्षिये अनिमित्तंत्तणंवापिछेदयेन्नकदाचन देवता
र्थंद्विजार्थेवाहत्वापापैर्नलिप्यते असंस्कृतेपिवेत्तीर्थेवला
त्कारेणमैथुनं स्वक्षियेणाहतंमांसंरौरवंनरकंव्रजेत् स्व
र्गादिषुणपलोकेषुदेवादन्योयथानहि तथैवचक्रमध्ये
तुदेवताःसर्वमानवाः जातिभेदोनचक्रेस्मिसर्वेशिव
समाःस्मृताः वेदोपस्थितमेवंहिसर्वंब्रह्मेतिचाब्रवीत्

बहुनात्रकिमुक्तेनचक्रमध्येऽलेश्वरि मद्रूपाःपुरुषा
सर्वैस्त्वद्रूपावनिताःस्मृताः चक्रमध्येतुमूढात्माजाति
भेदंकरोतियः तंभक्षयन्तियोगिन्यस्त्वांशापेऽकुलनायि
के मद्यऽमांसमद्र्देवेत्तुमांसभारशतैरपि नतुष्यामि
वरारोहेभगालिंगामृतेविना नचक्राङ्कंनपद्माङ्कंनव
ज्राङ्कमिदंजगत् लिङ्गाकञ्चभगाकञ्चतस्माच्छक्तिशि

श्री·
३१
31

वात्मकं शिवशक्तिसमायोगोयस्मिन्कालेप्रजायते सा
सत्याकुलनिष्ठानांसमाधिस्थैः प्रतीयते कामुकोनस्त्रि
यंगछेदनिछन्नीमदान्वितो मद्यःसंस्कारसंयुक्तांविहिता
न्वस्त्रियंव्रजेत् उत्तमानित्यपूजास्यान्मध्यमंपर्वपूजनं
मासपूजाधमादेविमासाद्वर्द्धपशुर्भवेत् विहितैर्मादि
भिर्द्रव्यैमासाद्वर्द्धैसमर्चयेत् मद्यंमांसंचमत्स्यंचमुद्रामै

ष्ठुनमेवच मकारपञ्चकन्देविदेवताप्रीतिकारकं
मादिपञ्चकमीशानिदेवताप्रीतयेस्त्वधीः यथाविधि
निषेवेतत्त्स्मयाचेत्सपातकी वीरहत्याहृथापानंवी
रद्रव्यापहारणं वीरस्त्रीगमनंचैवतत्संसर्गश्चपञ्च
मः महापातकमित्युक्तंकौलिकानांकुलान्वये नार्च
येदेकहस्तेननापिवेदेकपाणिना मत्स्यमांसासवैर्दे

श्री॰
३२
32

विनार्चयेत्पशुसन्निधौ प्रणम्य प्रविशेच्चक्रं विनिर्गच्छेत्प्र
णम्य च एकासनेनिविष्टा ये भुञ्जते चैकभाजने एकपा
त्रेपिवेद्द्रव्यंतेयान्तिनरकंप्रिये चक्रमध्ये त्त्वविधियाकर
प्रक्षालनादिकं यःकरोतिविमूढात्मासभवेदापदांप
दं निष्ठीवनंमलंमूत्रमथोवायुप्रविसर्जनं श्रीचक्रमध्ये
यःकुर्यात्सभवेद्योगिनीपशुः परीहासंप्रलापञ्चवित

ण्डाबङ्गभावणं औदासिन्यं भयं क्रोधं चङ्क्रमथ्ये विवर्जये
त् नपद्भ्यां संस्पृशेत्पात्रं नविन्दुं पातयेदधः नैकहस्तेन
दातव्यं नमुद्रावर्जितं प्रिये नपात्रं चालयेत्स्थानात्रेज
यीत्पात्रमङ्कुरं सशाद्वं नपिबेन्मद्यं तथैव च न पूरयेत्
मथित्वाज्ञानदण्डेन वेदागममहार्णवे सारज्ञानं महादे
विजलधर्मः समुद्धृतः एकतः सकलाधर्मा यज्ञतीर्थ

श्री॰
३३
33

व्रतादयः प्रकृतः कुलधर्मस्य तत्र कौलोधिकः प्रिये प्रवि
शन्ति यथा नद्यः समुद्रं सर्ववक्रगाः तथैव समयाः सर्वे
प्रविष्टाः कुलमेव हि यथा हस्तिपदे लीनं सर्वं प्राणिपदं
भवेत् दर्शनानि च सर्वाणि कुलपेवं तथा प्रिये यथा ज
ले नदीनां तु समुद्रसदृशं भवेत् तथा च कुलधर्मेण समो
न्यः समयो भवेत् यथा मरतरङ्गिण्यपानसमाः सकलाप

गाः तथैवसमयाः सर्वेकुलधर्मेणनोसमाः मेरुसर्षप
योर्यद्वत्सूर्यखद्योतयोरपि तथान्यसमयस्यापिकुलस्य
महदंतरं दर्शनेषुचसर्वेषुविद्याभ्यासेनमानवाः सो
हंलभतेकौलेतुसद्यएववनसंशयः बहुनात्रकिमुक्तेन
शृणुमत्प्राणवल्लभे नकौलसमयर्मोस्तितस्मादकुलना
यिके योगीचनैवभोगीस्याद्भोगीचनैवयोगवित् योग

श्री· ३४

34

भोगात्मकं कौलं तस्मात्सर्वाधिकं प्रिये भोगो योगायते साक्षात्पातकं सुकृतायते मोक्षायचे तसंसारः कुलधर्मे कुलेश्वरि ब्रह्मविष्णुरुद्रादिदेवतामुनिराक्षसाः कुल धर्मपरादेवि मानवोष्णुचकाकथा विहायसर्वधर्मांश्च नानागुरुमतानिच कुलमेवहिजानीयाद्यदीच्छेत्सिद्धि मात्मनः पूर्वजन्मकृताभ्यासात्कुलज्ञानंप्रकाशते स्व

मेक्षितप्रत्ययवडुपदेशादिकंविना जन्मान्तरसहस्रे
ष्वयाद्बुद्धिर्भाविताप्युरा तामेवलभतेजन्तुरुपदेशोति
रर्थकः सर्वधर्माश्चदेवेशिपुनरावर्तकाःस्मृताः कुल
धर्मैस्थितायेचतेसर्वेनतथास्मृताः प्राकृततपोदान
यज्ञतीर्थजपव्रतैः क्षीणाचान्तंत्रणांदेविकौलज्ञानं
प्रकाशते तमहंयस्यकल्याणितस्यतुष्टावुभावपि

श्री· ३५
35

देवतागुरुभक्त्यावकुलज्ञानं प्रकाशते शुद्धचित्तस्य शान्तस्य धर्मिणो गुरुसेविनः अतिगुप्तस्य भक्तस्य कुलज्ञानं प्रकाशते श्रीगुरौ कुलशास्त्रेषु कौलिके कुलप्रिये यस्य भक्तिर्दृढा तस्य कौलज्ञानं प्रकाशते शुद्धैर्विनय हर्षाद्यैः सदाचारैर्दृढव्रतैः गुर्वाज्ञया महायर्मैः कौलज्ञानम वाप्यते अनायासेन संसारसागरं यस्तितीर्षति कुलधर्मे

मिदंज्ञात्वामुच्यतेनात्रसंशयः श्रीदेव्युवाच ऊलेशश्रो
तुमिच्छामियोगंयोगीशलक्षणं ऊलभक्त्यार्चनफलंवद
मेकरुणानिधे ईश्वरउवाच शृणुदेविप्रवक्ष्यामियन्मां
त्वंपरिपृच्छसि नसम्प्रवणमात्रेणयोगःसाक्षात्प्रका
शते ध्यानंतुद्विविधंप्रोक्तंस्थूलसूक्ष्मप्रभेदतः साका
रंस्थूलमित्युक्तंनिराकारंतुसूक्ष्मकं स्थिरार्थंमनसः

केचित्स्थूलध्यानं प्रवदन्ते स्थूलेपिनिश्चलं चेतोभवेत्सू
क्ष्मेपिनिश्चलं करपादोदरास्यादिरहितं परमेश्वरि सर्व
तेजोमयंध्यायेत्सच्चिदानन्दनिष्कलं नोदेतिनास्तमध्ये
तिनवृद्धिंयातिनक्षयं स्वयंविभात्यथान्यानिभासयेत्सा
धनंविना अनन्तंगतमाद्रूपंसत्तामात्रमगोचरं वचसा
नात्मसंवेद्यंतज्ज्ञानंब्रह्मसंज्ञकं प्राणएवाप्रसञ्चारःपा

घाणाइवनिश्चलः परजीवेष्टसन्मार्गोयोगीयोगविड
च्यते यदर्थमात्रनिर्भासनिमितोदधिवत्स्तं स्वरूपशू
न्यंयज्ज्ञानेनसमाधिर्विधीयते नकिञ्चिच्चिन्तनाद्देवि
स्वयन्तत्वंप्रकाशते स्वयंप्रकाशिनेनत्वेतन्त्सणान्तन्मयो
भवेत् स्वप्नजाग्रदवस्थायांस्वप्नवयोवतिष्ठते विश्वासो
च्छासहीनंतनिश्चलंमुक्तपवसः निस्पन्दकरणग्रामस्तु

त्मनीगतकौलिकः यथात्मेमतवत्साद्धाजीवन्मुक्तःस्तउच्य
ते यथाजलेजलंक्षिप्तंक्षीरेक्षीरंघृतेघृतं अविशेषोभवेत्त
द्वज्जीवात्मपरमात्मनोः यथाध्यानस्यसामर्थ्यात्कीटोपिभ्र
मरायते तथासमाधिसामर्थ्याद्ब्रह्मभूतोभवेन्नरः क्षीरोद्घृ
तंघृतंयद्वत्तत्वमस्त्वेनपूर्ववत् पृथक्कृत्वागुणेभ्यःस्वादा
त्मानंदेहोच्यते यथागाढान्धकारस्थोनकिञ्चिदपिप

श्यति तथानिमीलेकालेहिप्रपञ्चंनैवपश्यति तथै
वोन्मेलिनेकालेप्रसादेनज्ञानलक्षणं जनःस्वदेहकाण्
तिंविजानातियथातथा परंब्रह्मस्वरूपीचवेत्तिविश्वं
सचेहितं विदितेनपरेनत्वेवसौंतीनयाविक्रमे किङ्कः
रत्वंहिगच्छन्तिमन्त्रामन्त्राधिपैःसह आत्मैकभावनिष्ठस्य
र्ययाचेष्टातदर्चनं योजल्पासचसन्मन्त्रोध्यानंयन्त्रनिरी

क्षणम् देहाभिमाने गलिते विज्ञाते परमात्मनि यत्र मनो
याति तत्र तत्र समाधयः भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसं
शयाः क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परात्मनि योगी
न्द्रेण यथा प्राप्तं विमलं परमं पदं देवासुरपदं यत्तत्प्राप्तं चा
पि न गृह्यते यः पश्येत्सर्वगं शान्तमानन्दात्मकमव्ययं
न तस्य किञ्चिदाप्तव्यं ज्ञातव्यं चावशिष्यते संप्राप्ते ज्ञानविज्ञा

नेत्रेयेचहृदिसंस्थिते लब्धेशान्तिपदेदेविनयोगोन
चधारणा परेब्रह्मणिविज्ञातेसमस्तैर्नियमैरलं ना
लहन्नेनकिंकार्यैलब्धेमलयमारुते नासिकाबन्धनं
नास्तिनासिकाबन्धनंनहि नियमोनियमोनास्तिस्वय
मोमितिपश्यतां नपद्मासनतोयोगोननासाग्रनिरीक्ष
णे ऐक्यंजीवात्मनोराहुर्योगंयोगविशारदाः ध्यायतां

श्री·
३९
39

क्षणमात्रं वा श्रद्धया मरमंत्विह यद्भवेत्तु महत्पुण्यं तस्या
ंशेनैव गम्यते क्षणं ब्रह्माहमस्मीति यः कुर्यादात्मचिन्तनं
स सर्वपातकं हन्यात्तमः सूर्योदये यथा व्रतं कृत्वा तपस्ती
र्थं दानं देवार्चनादिषु यत्फलं कोटिगुणितं तत्तदवाप्नोति
तत्त्ववित् उत्तमा सहजावस्था मध्यमा ध्यानधारणा जप
स्तुतिः स्यादधमा होमपूजाधमाधमा उत्तमा तत्त्वचिन्ता

स्याज्जपविंनातन्मध्यमा शास्त्रविज्ञायमात्तेयालोकवि
ज्ञायमायमा पूजाकोटिसमंस्तोत्रंस्तोत्रकोटिसमोजपः
जपकोटिसमंध्यानंध्यानकोटिसमोलयः नह्हिध्याना
त्परोमन्त्रोनदेवस्त्वात्मनःपरः नात्नुसन्ध्यात्परापूजान
ह्हित्पिः परंफले मन्त्रोदकैर्विनासन्ध्याजपहोमैर्विना
तपः उपचारैर्विनापूजायोगीनित्यंसमाचरेत् देहोदे

श्री· भ· 40

वलयोयोगीजीवोदेवः सदाशिवः त्यजेदज्ञाननिर्माल्यंसो
हंभावेनचिन्तयन् जीवःशिवःशिवोदेवःसजीवःकेवलः
शिवः पाशबद्धःस्मृतोजीवःपाशमुक्तःसदाशिवः तुषे
णवद्धोव्रीहिःस्यात्तुषाभावेनतण्डुलाः कर्मबद्धःसदाजी
वःकर्ममुक्तःशिवःप्रिये श्रयोनिष्ठान्तविप्राणांहृदिदेवो
मनीषिणां प्रतिमास्वल्पबुद्धानांसर्वत्रविदितात्मनो यो

निन्दास्तुतिशीतोष्णसुखदुःखादिवर्जितः समश्चेत्स्व
योगीन्द्रो हर्षामर्षादिवर्जितः निस्पृहो नित्यसंतुष्टः सम
दर्शी जितेन्द्रियः आस्तेदेहे प्रवासीव सयोगीपरतत्ववि
त् निःसङ्गो योनिर्विकल्पो निर्लिप्तोपाधिवासनः निज
स्वरूपनिर्मग्नः सयोगीपरतत्ववित् यथापङ्कुन्धवधि
रक्लीबोन्मत्तजडादयः निवसन्ति जलेशान्ति तथायोगी

श्री॰
५२

41

सतत्त्ववित् पञ्चमुद्रासमुत्पन्नपरमानन्दनिर्भरः यश्चास्ते
सञ्जयोगीन्द्रः पश्यत्यात्मानमात्मना श्चलिमांसाङ्गनासङ्गै
र्यत्सुखं जायते प्रिये तदेव मोक्षो विदुषामबुधानांच पा
तकं यदामांसासवोल्लासः सदाचरणचिन्तकः सदासंश
यहीनो यः कुलयोगी स उच्यते पिबन्मद्यं पलं खादन्स्वेछा
चारपरायणः अहं नेदनयोरैक्यं भावयन्निवसेत्सुखी

श्रामिषासवसौरभ्यहीनं यस्तमुखं भवेत् प्रायश्चित्ती स व
र्ज्यश्च पशुरेव न संशयः यावदासवगन्धःस्यात्पशुःपशुप
तिःस्वयं विनालिमांसगन्धेन साक्षात्पशुपतिःपशुः लोके
निकृष्टमुत्कृष्टं लोकोत्कृष्टं निकृष्टकं कुलमार्गे समुद्दिष्टं
भैरवेण महात्मना अनाचारःसदाचारस्त्वकार्यं कार्यमुत्त
मे असत्यमपि सत्यं स्यात्कौलिकानां कुलेश्वरि अपेयमपि

श्री॰
४२

42

पेयंस्याद्भोज्यंभोज्यमेवहि शत्रुवश्यापिमित्राणिअगम्यमपि
गम्यंस्यात्कौलिकानांकुलेश्वरि नविधिर्ननिषेधोवानपुण्यं
नचपातकं नस्वर्गोनैवनरकंकौलिकानांकुलेश्वरि शत्रु
वश्यापिमित्राणिसाज्ञाद्दासास्तुभूमिपाः पालयन्तिजनाः
सर्वेकौलिकानांकुलेश्वरि ससुरवाडगुखाःसर्वेगर्विताः
प्रणामन्तिच वायकामायकायन्तेकौलिकानांकुलेश्वरि

रस्तुवैयायनेदेविस्वर्गःमात्ताहृद्धायने मुएपायनेऊना
मङ्गाकौलिकानांऊलेश्वरि अनभित्ताश्चनत्तन्निदरिद्राय
नवन्निच विनष्टाश्चापिवर्द्धनेकौलिकानांऊलेश्वरि बऊ
नेड्डाकिमुक्तेनऊलयोगीश्वराःप्रिये सदासंकल्पसंसिद्धा
नात्रकार्याविचारणा येनकेनापिवेशेनयेनकेनापिल
न्निनः यत्रऊत्राश्रमेनिष्टन्कुलयोगीप्रवर्ततेने योगिनो

श्री॰
४३

विविधैर्दैवैर्नराणामुपकारकाः भ्रमन्ति पृथिवीमेनामवि
ज्ञातस्वरूपिणः सकृत्वैवात्मविज्ञानं स्थापयेत्कुलयोगिने
उन्मत्तमूकजडवन्निवसल्लोकमध्यतः अलक्ष्याह्रियथालो
के व्योम्नि चर्न्द्रकयोगिनिः नक्षत्राणां ग्रहाणां च न यथा वृत्त
न्तयोगिनां आकाशे पक्षिणां देवि जलेऽपि जलचारिणां य
थागतिर्नदृश्येत तथा वृत्तन्तयोगिनां अप्रसन्नश्च भावने

43

चरन्मत्ताइववाप्रिये पामराइवदृश्यन्ते कुलयोगविशारदाः
जना यथावमन्यन्ते गच्छेयुर्नैव सङ्गतिं न किञ्चिदपि भा
षन्ते यथा योगी प्रवर्तते मुक्तोऽपि बालवत्क्रीडेत्कुलेश
जडवच्चरेत् यथाहमिति लोकोऽयं जुगुप्सति ॥ तत्
विलोक्य हृष्टो याति तथा योगी प्रवर्तते क्वचिच्छिष्टः क्व
चिद्भ्रष्टः क्वचिद्भूतपिशाचवत् नानावेषधरो योगी विच

स्त्री·
४४

44

देव्वमहीतले योगिलोकोपचाराययोगभन्ननशङ्कया ना
नुग्रहान्द्मोसर्वज्ञीडतेजगतीतले सर्वशोषीयथासूर्यः
सर्वभक्षीयथानलः योगीभुङ्क्ते·खिलान्कामान्नयापापैर्न
लिप्यते सर्वस्पर्शीयथावायुर्यथाकाशञ्चसर्वगं सर्वे
यथानदीस्नानात्तथायोगीसदाशुचिः यथाम्लेच्छगृहाना
दियोगिहस्तार्पितंशुचिः यथाचरन्तिदेवेषिऊलज्ञान

विशारदाः नदेवविद्धांमार्गमात्मनोहितकांक्षिणां
यस्मिन्चरन्तियोगीन्द्राःसमार्गःपरमेश्वरि यस्मात्तुदेति
सूर्यस्तस्यैवपूर्वानिगद्यते यत्रयत्रगजोयातितत्रमार्गो
यथाभवेत् जलयोगीचरेद्यत्रससमार्गःजलेश्वरि न
दीवक्त्रामस्त्रेकर्तुंनिरोद्धुंनतस्त्रवाहकं स्वेच्छाविहारिणंस
न्तेकोवावारयितुंक्षमः यद्वन्मन्त्रवलोपेतःक्रीडन्सूर्यो

श्री·
४५
45

नलिप्यन्ते नहद्दन्नदृष्यन्तेज्ञानीक्रीडविन्द्रियपन्नगैः निह
न्तसत्वसन्नष्टाविडरागमवत्सलाः ऊलज्ञानरताःपुगन्नाम
न्नक्तास्तेचकौलिकाः श्रसदक्रोपदम्भाश्चाहङ्काराःसत्यवा
दिनः कौलिकेन्द्रास्त्वचपलायेनद्रियवशानुगाः कीर्तमा
नेऊलेयेषांरोमाञ्चोगद्गदस्वरः आनन्दश्चाननोदेविकथि
तःकौलिकेश्वरः सर्वधर्माधिकोलोकेऊलधर्मःशिवोदि

तः इतियेनिश्चितधियः प्रोक्तास्तेकौलिकोत्तमाः योभ
वेत्कुलतत्वज्ञः कुलशास्त्रविशारदः कुलाचीनरतः स
म्यक्कौलिकोनापरः प्रिये कुलभक्तकुलाज्ञानात्कुला
चारात्कुलाहृतात् प्रीतोभवतियोदृष्ट्वाकौलिकेन्द्रः स
मेप्रियः तत्वत्रयस्यस्वीकारात्कुलमन्त्रार्थतत्ववित् दे
वतागुरुभक्तश्चकौलिकः प्राणदीक्षया डलेभं सर्वलो

श्री॰
५८

46

केषुकुलाचारप्रदर्शिनं श्वपाकेनैवपुण्यमस्यलभतेनान्य
थाप्रिये संस्मृतः कीर्तितोदृष्टोवन्दितोभावितोपिवा पु
नातिकुलधर्मिष्टश्चाण्डालोऽपियदृच्छया सर्वज्ञोवापि
मूर्खोवाशुद्धमोवाधमोऽपिवा देवियत्रकुलज्ञानीतत्राहं
चत्वयासह नाहंवसामिकैलासेनमेरौनचमन्दरे कु
लज्ञायत्रतिष्ठन्तितत्रतिष्ठामिभाविनि सहस्रमपिमन्त्रव्यं

यत्रमाहेश्वरोजनः दृष्टव्यश्चप्रयत्नेनतत्रसन्निहितोप्य
हं श्रुतिहरेस्थितोवापिदृष्टव्यःकुलनायकः समीपेवर्त्तमा
नोऽपिनदृष्टव्यःपशुःप्रिये कुलज्ञानीभवेद्यत्रसदेशःपु
ण्यभाजनः दर्शनादर्चनात्तस्यत्रिसप्तकुलमुद्धरेत् कुल
ज्ञानिनमालोक्यस्वसन्तानगृहस्थितं तृप्यन्तिपितरःसर्वे
यास्यामःपरमांगतिं समाश्वसन्तिपितरःहृष्टाइमिवक

श्री
५७

47

षकः अस्मत्कुलेषु पुत्रो वा पौत्रो वा कौलिको भवेत् स धन्यः
खलु लोकेऽस्मिन्पुरुषः क्षीणकल्मषः यत्समीपं समायाति
कुलचार्यायदि प्रिये कौलिकेन्द्रः समायाति कौलिका वस
तिं प्रति समायाति महादेवि योगिन्यो योगिभिः सह प्रवि
श्य कुलयोगीशं भुञ्जते पितृदेवताः तस्मात्तं पूजयेद्भक्त्या
कुलज्ञानपरायणात् अभ्यर्चयित्वा त्वां देवि तद्भक्त्या त्वार्च्य

यन्निये पापिष्ठास्त्वत्प्रसादस्यभाजनंनभवन्तिते नैवेद्यं
प्रकृतोत्पन्नंदर्शनात्स्वीकृतंत्वया रसान्भक्तस्यजिह्वाया
मश्नासिकमलेक्षणे त्वदङ्कंपूजयेद्देविपूजितोहंनसंश
यः तस्मान्ममप्रियाकाङ्क्षात्वङ्क्तानेवपूजयेत् यत्कृतं
कुलनिष्ठानांनदेवानांकृतंभवेत् देवाःकुलप्रियाःसर्वे
तस्मात्कौलान्समर्चयेत् नतुष्यामिहमन्यत्रतथाभक्त्या

स्त्री·
षद
48

सहस्रजितः कौलिकेन्द्रैः वितनेसम्पग्यथाञ्चयामिपार्वति
यत्फलं कौलिकेन्द्राणां सुजनालभनेप्रिय तत्फलंनाप्नुया
त्तीर्थ्यतपोदानमखव्रतैः दत्तमिष्टंऽस्तंतंनसंपूजितं जमम
म्बिके कौलिकेनभवेद्यार्थ्ये कौलिकंयोऽवमानयेत् स्म
शानेतद्गृहंदेविसपापीश्वपचाधमः यःप्रविश्यकुलेय
मंकुलाचारंनवेत्तिचेत् कुलनिष्ठान्परित्यज्ययञ्चान्यान्से

प्रदीयते तद्दानं निष्फलं देवि दाता च नरकं व्रजेत् भिन्न

भाण्डे जलं तद्वच्छिलायामुप्तबीजवत् भस्मनीव हुतं ह

व्यं तत्त्वज्ञानमकौलिके यथाशक्त्या तु यत्किञ्चिद्योदद्या

त्कुलयोगिने विशेषतिथिषु प्रीत्या तत्फलं नैव वर्ण्यते

यो देवि शिष्यमाहूय कुलज्ञानं प्रभेदिने अभ्यर्च्य देवता बु

द्ध्या गन्धपुष्पाक्षतादिभिः मादिभिः पञ्चमुद्राभिः सन्तर्प्य

श्री·
४५

49

परितोषयेत् तेन तुष्टेन तुष्टाः स्युः सर्वदेवताः भगिनीं
वा सुतां भार्यां यो दद्यात्कुलयोगिने मध्यमन्नाय देवेशि तस्य
पुण्यं न गण्यते अविनीतवितीर्णसमग्रयत्नविवर्द्धितं प
रलोकस्य पाथेयं वीरचक्रेऽर्पितं मधुः पापाचारसमायुक्ते
सर्वलोकबहिष्कृते जायते हि कुलद्रव्यं कुलयोगीश्वरार्पितं
यस्मिन्देशे वसेद्वीरः कुलपूजारतः प्रिये सोऽपि देशो भवेत्पुण्यः

किंपुनस्तत्पुरःस्थिताः कौलिकेन्द्रसहस्रेषु तर्पणं कोटि
गुणंभवेत् किंपुनर्बहुभिर्भक्तैस्तर्पणेनैव गणपते तस्मा
त्सर्वप्रयत्नेनसर्वावस्थासुसर्वदा कुलधर्मपरोभूयाज्ज
ल्ज्ञानिनमर्चयेत् ज्ञानिनोज्ञानिनोवापियावद्देहस्यधा
रणं तावद्धर्मसमाचारःकर्तव्यःकर्ममुक्तये कर्मणामी
लितंज्ञानंज्ञानेनसमतांव्रजेत् शिवेनैनैवमुक्तिःस्याद

श्री·
प·
50

तःकर्मसमाचरेत् अर्थादनित्यकर्माणिनित्यकर्माणिवाचरे
त् इहामुत्रफलाकाङ्क्षीकः अतःस्यात्सरक्षिये सर्वकर्माणि
संत्यक्तुंनशक्यंदेहधारिणा त्यजेत्कर्मफलंयोवासत्यागीत्य
भिधीयते स्वकार्येषुप्रवर्त्तन्तेकरणानीतिचिन्तयन् अहं
भावमपास्यैवयः अर्थात्सनलिप्यते क्रियमाणानिकर्मा
णिज्ञानशामेरनन्तरं नसंस्पृशन्तितत्त्वज्ञंजलंपद्मदलं

यथा तत्वनिष्ठस्यकर्माणिपुण्यापुण्यानिसंहृयं प्रया
न्तिनैवलिम्पन्तिक्रियामतन्तिवाञ्छना उत्पन्नसहजानन्द
स्तत्वज्ञानरतःप्रिये सर्वसंकल्पसंत्यक्तःसविद्वान्कर्मसं
त्यजेत् हृथ्येवयैःपरित्यक्तंकर्मकाण्डमपंडितैः पाषण्डाः
पण्डितंम्मन्यास्तेयान्तिनरकंप्रिये फलंप्राप्ययथाहन्तः
पुष्पंत्यजन्तिनिस्पृहः तत्वंप्राप्यतथायोगीत्यजेत्कर्मपरि

श्री॰
५१

यहं अश्वमेधायुतेनापि ब्रह्महत्यायुतेन वा पुण्यपापैर्न लिप्यन्ते येषां ब्रह्म हृदि स्थितं । एषियोयानि कर्माणि जिह्वोपस्थनिमित्ततः जिह्वोपस्थपरित्यागी कर्मणा किं करिष्यति इति ते कथितं किञ्चिद्योगं योगीश लक्षणं समासेन कुले शानि किं भूयः श्रोतुमिच्छसि इति श्रीकुलार्णवे महारहस्ये शानसाहस्र्यां संहितायां पञ्चमखण्डे कुलयोगादिक ।

51

थनेनामनवमोल्लासः पूजाचमजयनपायजलादिशास्त्रे
सेनापतिःस्वयमसौपदयोःप्रमाणः श्रात्पत्तिकीचरणभ
क्तिरियंपताकाडगेतिडुन्दुभिरवोविजयेयमस्य ॥ श्री
दुर्गायैनमः कलार्णवे अन्तःकौलोबहिःशैवोजनमध्ये
तवैष्णवः कौलंसुगोपयेद्देविनारिकेलफलाम्बुवत् ऊ
लधर्मादिकंसर्वंसर्वावस्थासुसर्वदा गोपयेच्चप्रयत्नेन

स्त्री
५२
52

जननीजारगर्भवत् वेदशास्त्रपुराणानि स्पष्टानि गणिकाइ
व इयन्तुशाम्भवेविद्यागुप्ताकुलवधूरिव गमन्तुकौलिका
चारमन्तुरक्ष्यान्ति देवताः वांछासिद्धिं प्रयच्छन्ति नाशयन्ति
प्रकाशकान् कुलेशिकुलशास्त्रज्ञाः कुलपूजापरायणाः
येत्वंरहसिसेवन्तेतिष्टन्तितवसन्निधौ गुरुंप्रकाशयेद्धीमा
नमन्त्रंयत्नेनगोपयेत् अप्रकाशप्रकाशाभ्यांनश्यतःसम्प

दाग्रुषी सर्वाचारपरिभ्रष्टः कुलाचारं समाश्रयेत् कुला
चारपरिभ्रष्टो रौरवं नरकं व्रजेत् शास्त्रेषु निष्कृतिर्दृष्टा
महापातकिनामपि कुलभ्रष्टस्य देवेशि न दृष्टा निष्कृ
तिः क्वचित् कुलधर्मं समाश्रित्य यथाचारं यो न पालयेत्
यथेष्टाचारिणस्तस्य महापातकिनः प्रिये आपदं दुरितं
रोगादारिद्र्यं कलहं भयं योगिनीनां प्रकोपश्च सवलिता

श्री·
५३
53

निपदे पदे आचारपालनात्सत्यमाज्ञासिद्धिर्भविष्यति ना
भिषेको न मन्त्रो वा न शास्त्रपठनादिकं कारणं कुलमार्ग
स्य सदाचारः कुलेश्वरि ड: शीलोपि सहजं कृपाकारयेच्चः
कुलार्चनं सम सहजं निमवाप्नोति किं तु नान्ये हि जातयः त
स्मात्सर्वप्रयत्नेन सर्वावस्थासु सर्वदा कुलपूजारतो भूया
दभीष्टफलसिद्धये कुलपूजाधिको यज्ञः कुलपूजादिकं

व्रतं जलपूजादिकं तीर्थं जलपूजादिकं जपः जलपूजा
दिकं दानं जलपूजादिका क्रिया जलपूजादिकं ज्ञानं जल
पूजादिकं स्तवं जलपूजादिको धर्मः जलपूजादिकं फलं
जलपूजादिकं ध्यानं जलपूजादिकं महत् जलपूजादिको
योगः जलपूजादिका गतिः जलपूजादिकं भाग्यं जलपूजा
दिकार्चना नास्ति नास्ति पुनर्नास्ति त्वां प्राप्य जलनायिके ब

श्री॰
५४

54

ङनात्रकिमुक्तेनरहस्यंशृणुपार्वति वेदशास्त्रोक्तमार्गेणाकु
लपूजांकरोतियः तत्समीपेस्थितिंयातिविधिनान्यत्रभावि
नि इदंसत्यमिदंसत्यंसत्यंसत्यंनसंशयः स्वर्भूमिदिग्जल
गिरिवनसर्वचराःप्रिये सहस्रकोटियोगिन्यस्ताराद्याभै
रवाश्चापि नियुक्ताहिमहादेविकुलसंरक्षणायच दिवसेदि
वसेसर्वेपर्वणेजलकानने साधनेनैववीक्षन्तेहस्त्रपूजा

दिनेष्मया अपूजितास्तनिर्न्नंतिपालयन्तिप्रपूजिता:
गुरुभक्तास्सदाचारानृगुरुधर्मान्सदाशिवान् भक्तिहृी
नान्तुराचाराज्ञाशयन्तिप्रकाशकान् ऊलार्मिवेप्रथ
मोल्लासे श्रीईश्वरउवाच शृणुदेविप्रवक्ष्यामियन्मांत्वंप
रिपृछसि नस्यश्रवणमात्रेणसंसारान्मुच्यतेनर: अ
स्तिदेव:परंब्रह्मस्वरूपीनिष्कल:शिव: सर्वज्ञ:सर्व

श्री
५५

55

कर्त्ताचसर्वेश्वरोनिर्मलोव्ययः स्वयंज्योतिरनाद्यन्तोनिराकारः
परात्परः निर्गुणःसच्चिदानन्दस्तदंशाजीवसञ्ज्ञिकाः अप्र
ज्ञाघासमसहितायथाग्नेर्विस्फुलिङ्गकाः सर्वेस्तुपाधिस
ङ्गिज्ञास्तेकर्मभिरनादिभिः स्वावृङः स्वप्रदैःस्वैयैपुण्यपापै
र्नियंत्रिताः उद्भिज्जादिस्थूलदेहमाश्रुभोगपञ्चकर्मजं प्र
तिजन्मप्रपद्यन्तेमानसंसूक्ष्मचेतसः सूक्ष्मलिंगारणेर

न्तदामोक्षादत्रयं प्रिये स्थावराः कृमयाश्चाब्जाः पशवः
पक्षिणो नराः धार्मिकास्त्रिदशास्तद्वन्मोक्षिणश्च यथा
क्रमं चतुर्विधशरीराणि धृत्वा लक्षसहस्रशः सुकृ
तैर्मानवो भूत्वा ज्ञानी चेन्मोक्षमाप्नुयात् चतुरशीतिल
क्षेषु शरीरेषु शरीरिणां न मानुष्यं विनान्यत्र तत्वज्ञानं
च लभ्यते अत्र जन्मसहस्रेषु सहस्रैरपि पार्वति कदाचि

श्री॰
५८

56

लभ्यते जन्तुर्मानुष्यं प्राप्यसञ्चयात् आत्मैव यदि नात्मान
महितेभ्यो निषेधयेत् कोन्यो हितकरस्तस्मादात्मना रक
क्ष्यते इहैव नरकव्याधेश्चिकित्सां न करोति यः गत्वा नि
रौषधं देशं व्याधिस्थः किं करिष्यति यावत्तिष्ठति देहोयं
तावत्तत्त्वं समभ्यसेत् सदीप्तभवने को वा कूपे खनति उ
मितिः संपदः स्वप्नसंकाशा यौवनं कुसुमोपमं तडिच्च

पलमाणुश्चकस्मात्ज्ञानतोऽप्यतिः स्वः कार्यमथयकर्जवं
पूर्वोक्तेचापराक्तिकं नहिप्रतीत्तनेम्रस्तुःकृतमस्यनवा
कृतं ब्रह्मादिस्समहेशादिदेवताभूतराशयः सर्वैवाश्री
प्रयास्यन्तितस्मात्श्रेयःसमाचरेत् जीवत्प्राणजलोकेवदे
हादेहान्तरंविशेत् संप्राप्यचोत्तरंदेहंदेहस्यातिपूर्वजं बा
ल्यंयौवनवृद्धत्वंयथादेहान्तरादिकं तथादेहान्तरप्राप्ति

श्री॰
५७
57

गृहाद्गृहमिवागतः निःसंगएवमोक्षःस्याद्दोषाःसर्वैवसंग
जाः संगात्यक्तस्तपोज्ञानीकिमुतानात्मवित्प्रिये संगःसर्वात्म
नात्याज्यःसचेत्यक्तुंनशक्यते सद्भिःसहप्रकुर्वीतममतासंगो
हिभेषजं दुःखमूलंहिसंसारःसयस्यास्तिसदुःखितः तस्य
त्यागःकृतोयेनससुखीनापरःप्रिये आदिमध्यावसानेषुसर्व
वंदुःखमिदंयतः तस्मात्संत्यज्यसंसारंतत्त्वनिष्ठःसुखीभवे

त् लौहदारुमयैःपाशैर्दृढंबद्धोपिमुच्यते स्त्रीधनादिषुसं
युक्तोमुच्यतेनकदाचन मांसलुब्धोयथामत्स्योलौहशंकुं
नपश्यति सुखलुब्धस्तथादेहीयमबाधांनपश्यति निद्रा
भीमैथुनाहारः सर्वेषांप्राणिनांसमाः ज्ञानवान्मानवः
प्रोक्तोज्ञानहीनःपशुःप्रिये प्रभातेमलमूत्राभ्यांमध्याह्ने
क्षुत्पिपासया रात्रौमदननिद्राभ्यांबाध्यंतेमानवाःप्रिये

श्री॰
५८
58

स्वदेहधनदारादिनिरताःसर्वमानवाः जायंतेचम्रियन्तेच
हाहन्ताज्ञानमोहिताः स्वस्ववर्णाश्रमाचारनिरतासर्वमा
नवाः नजानंतिपरंब्रह्मध्यानशून्यापर्वति काममात्रे
णसन्तुष्टाःकर्मकाण्डरतानराः मंत्रोपचारहोमाद्यैर्भ्रामिताः
कल्पविस्तरैः एकभक्तोपवासाद्यैर्नियमैःकायशोषकैः मू
ढःपरोक्षमिच्छन्तितवमायाविमोहिताः देहदण्डनमात्रेण

कामुक्तिरविवेकिनां वाल्मीकताडनाद्देविस्मृता किं त्वमहो
रगाः सांसारिकसुखासक्तं ब्रह्मज्ञोस्मीतिवादनं कर्मब्रह्मो
भयभ्रष्टं जंत्यजेदन्त्यजं यथा गृहारण्यसमालोके गतव्रीडा
दिगंबराः चरन्तिगर्दभाद्याश्चयोगिनस्तेभवन्तिकिं तृणप
र्णोदकाहाराः सततं वनवासिनः हरिणादिमृगादेवियोगि
नस्तेभवंतिकिं पारावताः शिलाहाराः परमेश्वरि चातकाः

श्री॰
५५
59

नपिबन्तिमहीतोयंयोगिनस्तेभवन्तिकिं शीतवातातपसहा
भक्ताभक्तसमाःप्रिये तिष्ठन्तिशूकराद्याश्चज्ञानिनस्तेभवन्ति
किं आजन्ममरणान्तंहिगङ्गातीरंसमाश्रिताः मण्डूकमत्स्य
प्रमुखायोगिनस्तेभवन्तिकिं तस्माद्दिव्यादिकंकर्मलोकर
ञ्जनकारकं मोक्षस्यकारणंसाक्षात्तत्वज्ञानंकुलेश्वरि षड्
दर्शनमहाकूपेपतिताःपशवःप्रिये परात्मनंनजान

न्तिपशुपाशानियंत्रिताः पठन्तिवेदशास्त्राणिविवदंति
परस्परं नजानन्तिपरंतत्वंदर्वीपाकरसंयथा प्रज्ञान
हीनस्यपठनमंधस्यदर्पणंयथा देवि प्रज्ञावतःशास्त्र
तत्वज्ञानस्यकारणं वेदाद्यनेकशास्त्राणिस्वल्पायुर्विघ्न
कोटयः तस्मात्सारंविजानीयात्क्षीरंहंसइवाम्भसि अभ्य
स्यसर्वशास्त्राणितत्वंज्ञात्वातुबुद्धिमान् पलालमिवधा

श्री॰
८॰
60

न्यार्थीसर्वशास्त्राणिसंत्यजेत् यथाम्नतेनत्त्वमस्यनाहारे
णप्रयोजनं नवस्त्रस्यनथादेविनशास्त्रेणप्रयोजनं न
वेदाध्यायनान्मुक्तिनशास्त्रपठनादपि ज्ञानादेवहिमुक्तिः
स्यानान्यस्माद्वीरमन्दिने नाश्रमाःकारणंमुक्तेर्दर्शनानि
नकारणं तथैवसर्वशास्त्राणिज्ञानमेवहिकारणं श्रद्धे
नेहिशिवेप्रोक्तेक्रियायामस्वविवर्जिते गुरुवक्त्रेणलभ्ये

तन्मन्यथागमकोटिभिः अद्वैतंकेचिदिछंति द्वैतमिछं
न्तिचापरे ममतत्वंनजानंति द्वैताद्वैतविवर्जितः द्वेप
देवत्यमोक्षायममेतिनिर्ममेतिच ममेतिवाध्यतेजन्तु
र्निर्ममेतिविमुच्यते यावत्कर्मादिदीप्येनतावत्संसारवा
सना यावदिंद्रियचापल्यंतावत्तत्वकथाकुतः यावद्दे
हाभिमानञ्च ममतायावदेवहि यावन्नगुरुकारुण्यं

श्री·
८१

61

तावन्नत्वकथाऽऽनतः यावत्स्वयत्नवेशोऽस्मि यावत्संकल्प
कल्पनं यावन्नमनसस्स्थैर्य्यं तावन्नत्वकथाऽऽनतः ताव
त्तपोवनेतीर्थंजपहोमार्चनादिकं वेदशास्त्रागमकथा
यावन्नत्वंनविंदति तस्मात्सर्वंप्रयत्नेनसर्वावस्थासुस
र्वदा भक्तिनिष्ठोभवेद्देवियदेच्छेत्सिद्धिमात्मनः यमंज्ञात
स्तुष्यस्यस्वर्गलोकफलस्यच तापत्रयार्तिसंतमस्छाया

मोक्षनरोःप्नुयात् इतिकुलार्णवेमहारहस्येसर्वागमोत्त
मेसपादलक्षग्रन्थेपञ्चमखण्डेऊर्द्धाम्नायतन्त्रेजीवस्थि
तिकथनंनामप्रथमोल्लासिकेवितत्श्लोकः ॐनमःपरदे
वतायै नत्वानन्दतरंगिण्यां मेदिनीशास्त्रसंपूर्णोब्राह्म
णोवेदपारगे दत्वायत्फलमाप्नोतितत्फलंकौलिकार्चने
अश्वमेधसहस्राणिवाजपेयशतानिच इष्ट्वायत्फलमा

श्री॰
८२
62

मोतितत्फलंकौलिकार्चनात् मेरुतुल्यसुवर्णंचब्राह्मणेवे
दपारगे दत्वायत्फलमाप्नोतितत्फलंकौलिकार्चनात् वा
पीकूपतडागादिकृत्वायत्फलमाप्नुयात् तत्फलाल्लक्षगु
णितंकौलिकानांप्रपूजनं कौलिकंपूजयेद्यस्तुकुलधर्म
स्वपरायणः सयातिनरकेघोरेसत्यमेवनसंशयः ज्ये
ष्ठानुक्रमतोदद्याद्वीरपात्रेकुलेश्वरः क्षुद्रादिरहितंपा

ङ्केनार्पयेत्तु कदाचन एकेन पाणिना वापि कदाचिन्नो
र्पयेद्बुधः अभिषिक्ताय वीराय कुलमन्त्रपराय च न
नःसामयिकःपात्रं पाणिभ्यामाहरेदथ नमस्कृत्य यथा
न्याय मन्यथा नरकं व्रजेत् आधारोपरि संस्थाप्य ततो म
न्त्रं प्रकल्पयेत् तस्योपरि जपेन्मन्त्रमष्टधा साधकोत्तमः
आनन्दभैरवं देवं श्रीगुरुं परमेश्वरीं विधिवत्तर्पणं कु

श्री॰
८३
63

त्वानत्वसुद्धिंसमाचरेत् विधिवद्वन्दयेत्पात्रं प्राणमेन भक्ति
तोमिथः दत्तेसुज्ज्वादिकंनीत्वासव्येनपात्रमाहरेत् गृह्णा
मीतिस्वयंप्रोच्यतनोत्तुर्त्तालभेद्रुयः गुरुभ्यःसाधकेभ्यो
वाज्ञयस्वेतिसमाहितः इत्थंवाणगुणादित्तोलकमितं
धृत्वाकरांभोरुहेध्यायन् श्रीगुरुपादुकांासितमहाप
मेस्तुयामंडले पश्चात्कन्दनिवासिनींभगवतींचैतन्यरू

पांपरांसंतर्प्यमस्तत्तथारयासस्सक्तुजितोदीप्यंत्रिलोकत्रये
शाहेनैवापिवेत्पयामस्तत्रसंनैकेनहस्तेनवाविंडेनैवाति
यानयेत्त्रितिनलोपज्ञानपात्रंस्पर्शेत् सायारंनह्लिचा
लयेन्नहितथास्थानांतरेस्थापयेन्मुद्रामीनपलादिवर्जि
तमहोनैवंकुलीनोहरेत् नस्थूलंनहिसूक्ष्ममेवचषकं
भग्नंनवासंकरंनैवंतीर्थसंपूरितंनचसभागंयेनसीनं

त्रिभागंपूरयेत्पात्रंना
निपात्रंप्रपूरयेत् =

श्री॰
द४

64

विना नैवंप्रतिरसान्वितं किमप्यवामन्त्रैर्विहीनं न हि स्त्री
कुर्यात्कुलनायिकोयदिभवेद्धर्मीप्यमोक्षोरतः निजशक्ति
वीरशक्तिंकुलदीक्षारंतांचवा पाययित्वापिवेद्यमिति
शास्त्रस्यनिर्णयः एकासनेचक्रमध्येनिविष्टायेनरायमाः
भुञ्जानाएकपात्रेवानेपतन्तिमहादारुणे एकेनचषकेना
पियेपिवंतिपरामृतं नेयान्तिनरकेघोरेमोहादत्तान

तोपि वा नैव संस्पृशेत् कुलद्रव्यमुच्छिष्टान्वितपाणिना प्र

ज्ञाल्य पाणी वा सेन कुलद्रव्याणि दापयेत् निजपात्रामृ

तं वीरो भैरवायापि नार्पयेत् अर्पणे सिद्धिहानिः स्यात् कुजा

भवति योगिनी गुरुशक्तिसुतानाञ्च गुरुजेष्ठकनिष्ठयोः

उच्छिष्टं भक्षयेत्स्त्रीणां नान्यो नोच्छिष्टमर्पयेत् सुविचार्य

पिवेत् मद्यं शाक्तुच्छिष्टं परामृतं वीरोच्छिष्टं चर्वणञ्च चर्व

श्री
८५

65

येत्कुलनायकः कनिष्ठेभ्यः स्वशिष्येभ्यो दयाद्वा छिद्रमेव हि
दर्शयेत्स्नेहेन योन्येभ्यः समवेदापदंपदं औदासीन्यं परीहासं
प्रलापं बहुभाषणं भयं क्रोधं वितण्डाञ्च चक्रमध्ये विव
र्जयेत् श्रीचक्रमध्ये यद्दत्तं शुभं वा यदि वाशुभं प्रमादेन
न वक्तव्यमित्याज्ञा शंभुना कृता त्यजेन्निष्ठीवनं चक्रे तथा
धोवायुनिर्गमं अन्योन्यं चषकं मंडीनाउयेत्कदाचन श

त्यविनातुयत्स्नानंयत्स्नानंमन्त्रुनाविना यत्स्नानंतर्पणेहीनं
नंतत्स्नानंनिष्फलंभवेत् विनाश्रद्धान्वितैस्तीर्थैर्नतर्पयेत्
कदाचन तर्पणंनिष्फलंविद्यात्क्रुद्धाभवंतिचण्डिका ब्र
ह्मज्ञानीकुलाचारेसुरांपीत्वास्खलन्मुहुः भूमौनिपति
तस्यांगेमिलन्तियदिरेणवः यावत्कालंरेणुसंख्यंब्रह्मलो
केमहीयते पीत्वापीत्वापुनःपीत्वापुनःपततिभूतले उ

श्री॰
९८

स्यायच पुनःपीत्वा पुनर्जन्म न विद्यते पीत्वा लिङ्गकुलाचारे प्र
मत्तायौवनोन्नता कोटिजन्मार्जितं पापं नन्दत्यणादेव नाशये
त् पीत्वापीत्वा जपित्वा च मुक्तः कोटिकुलैः सह ब्रह्मलोके
वसेन्नित्यं सत्यं सत्यं सुनिश्चितं तत्रैवलयमाप्नोति न पुनः
संपतेदिह अथमात्रकाभेदतन्त्रे श्रीदेव्युवाच मयदानेम
हापुण्यं सर्वतन्त्रेष्कृतं मया जातिभेदं न कथितं मिदानीं त

66

न्प्रकाशय शंकरउवाच सर्वयज्ञाधिपोविप्रः संशयोना
स्तिपार्वति सौत्रामण्यांमहायज्ञेचत्वारोब्राह्मणादयः
ब्राह्मणस्यमहामोहंमयदानंप्रियम्वदे ब्राह्मणःपरमे
शानियदिपानादिकंचरेत् तत्क्षणेशिवरूपोसौसत्यंस
त्यंहिशैलजे तोयेतोयंयथालीनंतेजस्तेजासिवायथा
घटेभग्नेयथाकाशंवायौवायुर्यथाप्रिये तथैवमद्यपा

श्री
८०

67

नेनब्राह्मणोब्रह्मणिप्रियेलीयतेनात्रसन्देहः परमात्मनि
शैलजेमयपानंविनादेवितज्ज्ञानंनलभ्यते अतएवहि
विप्रोहिमद्यपानंसदाचरेत् वेदमातृजपेनैवब्राह्मणोन
हिशैलजे ब्रह्मज्ञानंयदादेवितदाब्राह्मणउच्यते देवानां
मामृतंब्रह्मनदिदंलोकिकीसुरा सर्वंभोगमात्रेणसुरा
तेनप्रकीर्तिता मंत्रत्रयंसदापाठ्यंब्रह्मशापादिमोचनं

प्रकृर्वीन हिजेनैव न दाब्रह्ममयीह्वरा हविरारोपमात्रे

णवह्निर्दीमोयथाभवेत् शापमोचनमात्रेणह्वराभुक्ति

प्रदायिनी ग्नतपवाहिदेवेशिब्राह्मणःपानमाचरेत् स

ब्राह्मणःसवेदज्ञःसोग्निहोत्रीसदीक्षितः बहुकिंकथ्य

तेदेविसपवत्रिगुणात्मकः श्रीचंडिकोवाच कारणेनम

हामोक्तंनिर्माल्येनशिवास्यच कृतंवेदपुराणेषुनववक्रे

श्री॰
९८

68

सुरेश्वर श्रुत्वाहं त्वं न वतिर्मोक्षमयाहं कारणं विभो ॥ त्वद्वा
वाक्यं महादेव कथं वदसि योगभक्त श्रीशंकर उवाच ॥
शृणु देवि प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि तत्तत्सर्वं प्रवक्ष्यामि
सावधानावधारय चतुरशीतिलक्षेषु सहस्रेषु तथैव
हि भ्रमन्ते जन्तवो जीवास्ततो मोक्षस्य भाजनं एतन्मध्ये महा
ज्ञानं यदि स्याद्धीरवद्दिने तदा मोक्षमवाप्नोति भ्रमणं कस्य

वाभवेत् श्रुतएवमहादेविश्रमभावंमयाकृतं यस्यजन्म
नष्टर्वत्वंसकथंमोक्षभाजनं यस्यपापाधिकंदेविसकथं
स्वर्गभाजनं श्रुतएवमहेशानिश्रमैभावंमयाकृतं नि
र्मोल्येनभवेत्स्वर्गोनिर्वाणंस्वरयाभवेत् पापयुक्तोपिचा
एडालोनिर्मोल्यग्रहणेयदि तदामोक्षोभवेत्तस्यशिवरूपो
नचान्यथा महापातकयुक्तेनकारणंयदिपीयते ज्ञाना

न्मुक्तिंलभेत्सत्यंजातिभेदादिकंनहि सर्वजातिषुनिर्वाणं
ज्ञानेनपरमेश्वरि अतएवमहेशानिशुभभावेमयाकृते
शुभभावार्थयद्वाक्यंपरीहासार्थमेवच तत्तदर्थेनतद्वा
क्यंनमिथ्यापरमेश्वरि निर्वाणविषयेदेविमद्यंपरमका
रणं मद्यपानंविनादेविमहामोक्षोनलभ्यते चंडिकोवा
च गंगायांज्ञानतोमोक्षंतत्तैवस्त्रियतेयदि गंगायाश्चापि

केंनाथकारणेणपरदुर्लभं शंकरउवाच हर्स्यवल्लभ
यीदेवीसुरादेवीनचान्यथा नस्याश्चषोडशांशेकाया
गंगासुरसरिजिता निर्वाणतंत्रे श्रीशंकरउवाच श्रुणु
देविप्रवक्ष्यामितत्वंपरमदुर्लभं कृत्वागोपययत्नेन
स्वयोनिरिवसुन्दरि मद्यंमांसंतथामत्स्यंमुद्रामैथुनमे
वच पञ्चतत्वमिदंदेविनिर्वाणमुक्तिहेतवे सर्वैश्वर्ये

श्री॰
७॰
70

परंमोक्षंमद्यपानेनक्षौलजे मांसभक्षणमात्रेणसाक्षान्ना
रायणोभवेत् मत्स्यभक्षणमात्रेणकालीप्रत्यक्षताभवेत्
मुद्रासेवनमात्रेणब्रह्मोसौविष्णुरूपधृक् मैथुनेननमहा
योगीममतुल्योनसंशयः जन्मांतरेषुदेवेशिमयैवक
थितंपुरा माहात्म्यंचास्यदेवेशिपुरैवकथितंमया तत्व
ज्ञानमिदंकान्तेनिर्वाणमुक्तिकारणं पकत्रपंचतत्वानि

यद्वैवमेलनंभवेत् तद्वैवाहंप्रगच्छामितेनरामत्समाः
सदा सानारीकालिकारूपामत्तेनसंस्थाप्रलीयते येनराः
साधुरूपाश्चतत्वज्ञानापरायणाः जीवन्मुक्ताश्चतेप्रो
क्ताब्रह्मरूपाश्चनान्यथा साधुज्यादिमहामोक्षेनियुक्ता
क्षत्रियादिषु ब्राह्मणाःपरमेशानियदितत्वपरायणाः
सत्यंसत्यंपुनःसत्यंपरतत्वेप्रलीयते यथातोयंतोय

श्री॰
७१
71

मय्येलीयते परमेश्वरि तथैव तत्त्वसेवायां लीयते परमा
त्मनि इति ते कथितं कांते तत्त्वज्ञानं विमोक्षदं येन ज्ञान
प्रसादेन मोक्षसिद्धिर्न संशयः क्षितिं विना यथा नास्ति
संस्थितेः कारणं सदा तोयं विना यथा नास्ति पिपासाना
शाकारणं तमोहन्ता यथा नास्ति भास्करेण विना प्रिये
विना वह्निप्रयोगेन यथा किंचिन्न पच्यते विना चंद्रेण

देवेशियथाहिसृष्टिर्नजायते मातृगर्भंविनाक्वापिउत्प
त्तिर्नैवजायते अतएवमहेशानिगोपनंकुरुयत्नतः
दिव्याभावयुतोदेवितत्त्वज्ञानंसमाचरेत् वीरभावयु
तानांचतत्त्वमेवंसदानचे नपशोरालयेकुर्यान्नपशो
र्ज्ञानगोचरे नपशोःसन्निःधानेचनपश्योर्दृष्टिगोचरे
अन्यथापदिकीटस्पर्शनेनहिकारयेत् नचैवकाम

नासिद्धिर्यत्रचक्रंप्रपूजयेत् श्रीचक्रपूजांयःकुर्यात्सखवंशं
श्वरवयः अश्वमेधसहस्राणिवाजपेयशतानिच इष्ट्वाय
त्फलमाप्नोतितत्फलंकौलिकार्चनात् वापीकूपतडागानि
दत्वायत्फलमाप्नुयात् तत्फलंकोटिगुणितंयदिचक्रंप्र
पूजयेत् नदत्तंमेरुतुल्यंस्याद्धिंडसिंडसमोपमः प्रष्ठ
चमेरुसदृशंयदिचक्रंप्रपूजयेत् तन्मध्येवर्ततेदेविय

दिव्याधिभूतो नरः शिवबुद्ध्याप्रपूज्यो हि भ्रान्तितत्त्ववि
वर्जयेत् सूर्यस्य प्रतिबिम्बं यत्तोये च परिपश्यति गं
गान्तोये यथा सूर्यो हीनस्तोये न तथा पुनः सूर्यस्य दूषणं
नास्ति सूर्यैकः परितिष्ठति तथैव परमेशानि साधके
नास्ति दूषणं मंत्राराधनमात्रेण तदात्मा तन्मयो भवे
त् अतएव महेशानि दूषणं नास्ति रेतसि रेतः पवि

श्री॰
७३

७३

त्वंपरमंशक्तेर्मोक्षस्यकारणं एवंविद्रूपांयांनारीसर्व
त्तांऊरुतेयदि धनपुत्रैर्वर्जितश्चसचेडालोनचान्य
था इतितेकथितंकांतेतत्त्वज्ञानंविमोक्षदं येषांदेहे
महेशानितत्त्वज्ञानंविमोक्षदं येषांदेहेमहेशानित
त्वज्ञानंमयोदितं तेपुनर्जननीगर्भेनविशंतिकदा
चन जीवन्मुक्ताश्चतेप्रोक्ताःशिवरूपाश्चतेनराः पुर

श्रवणरसोल्लासे चंद्रसूर्यग्रहेदेविनराशिंगणयेत्क्व
चित् ब्राह्मणःक्षत्रियोवैश्यस्तथाशूद्रसत्तमापार्वति न
राशिंगणयेद्देगणयेपवनःसदा सूर्यग्रहणका
लाद्दिनात्मकालःप्रशस्यते सकालःपरमेशानिपरं
ब्रह्मसमूर्त्तिमान् ग्रहणेचंद्रसूर्यस्यनन्नपेयदिपाम
रः सर्वंपुण्यंपरित्यज्याविष्टायांजायतेकृमिः स्नानते

श्री॰
७४

74

त्रेपंचमपटले मायाविमुक्तिमार्गस्य विज्ञेया परिपन्थि
नी सा तु ह्याच जगद्धात्री मुक्तिदात्री द्विजेश्वर निराकारा
तु सा शक्तिर्वल्लरूपा मनातनी निराधारा ह्येककलास्व
रूपं वै विनिःसृता समयाचारतंत्रे गुह्यं शिवं तथा दे
वीं नित्यं चैकेन भावयेत् केवलं शिवरूपोऽहमिति ज्ञा
नं समाचरेत् जीवः शिवः शिवो जीवः स जीवः केवलः

शिवः पाशबद्धः सदाजीवः पाशमुक्तः सदाशिवः स
दाशिवमयोभूत्वापंचमुद्रादिकंचरेत् सर्वंब्रह्ममयंप
श्यन्दोषैर्नचाविलिप्यते मोहाद्वाकामतोवापियःक
श्चिदिहवर्त्तते सोऽधमःसाधकानांचनारकीभवतिध्रु
वं इहलोकेनिंदितस्यात्परत्रनरकंव्रजेत् आईश्चकवि
भागेनद्विधाचारंशृणुष्वप्रिये आर्द्राचारस्तुविज्ञेयोमका

श्री· ७५

75

रैपञ्चभिर्युतः मकारपञ्चरहितःशुक्लाचारःप्रकीर्तितः
कलौविशेषतोदेविशाक्ताचारःप्रकीर्तितः षडाम्नायेषु
देवेशिनानातन्त्रेषुदेवताः विद्यामंत्रविभागेनदेवता
श्चार्चिताःकलौ अथविजयाख्याने सिद्धास्यांशिवगेहि
नीकरतलसत्पाशाङ्कुशांभैरवींभक्ताभीष्टफलप्रदां
वरभयांसंसारबंधछिदां पीठस्थामपिमन्यतोऽङ्कव

रसांसम्विद्विलासांपरांवीराराधनपाडकांसुविजयांव
न्देजगन्मोहिनीं निरन्तरनंदे शुभवेश्या महावेश्या कुल
वेश्या महोदया जवेश्या देववेश्या ब्रह्मवेश्या च समथा
कुलजा शुभवेश्या सा निर्लज्जा मदनातुरा पशुभर्त्तोक्षि
तालोके शुभवेश्या प्रकीर्त्तिता कुलजा कुलवेश्या च म
हावेश्या प्रकीर्त्तिता महावेश्या कुलेशानि स्वेच्छया च

श्री॰
७९
७८

दिगम्बरी कुलवेश्याकुलीनाचवीरपत्नीकुलेश्वरि महो
दयासमीख्यातास्वेछयाचविपरीतगा राजवदाहरेयस्मा
द्राजवेश्याप्रकीर्त्तिता शिवेसंयोज्यचक्रेचजपप्रजापरा
यणा देववेश्यासमाख्यातात्रिषुलोकेषुपूजिता शिवे
संयोज्यचक्रेचजप्राचचातनम्बरेत् भगलिंगकथाला
पाज्बंबयेच्चपुनःपुनः एवंविधाकुलीनाचेद्ब्रह्मवेश्या

प्रकीर्त्तिता द्विप्रशाक्केवरशाक्केश्चैताः संज्ञाः प्रकीर्त्तिताः
चन्द्रवर्त्मोद्भवानांच संज्ञैताः परिकीर्त्तिताः वेश्यावद्म
नेयस्मात्तस्माद्वेश्याप्रकीर्त्तिता वर्त्मसंकरतो जाताः स
र्वावेश्याप्रकीर्त्तिताः ऊलमार्गगतायाच सावेश्यामोह
दायिनी चुंबनालिंगनंचैवरतिविग्रहदर्शने श्रामद्रुण
त्रिसन्ध्यंचभगलिंगस्यकीर्त्तनं वेश्यानांचजपांगेदेशं

श्री॰
७७

करेणाप्रशेदितं जपांगेनविनावेष्पानकुर्यात्त्विरसंगगमं ज
पांगंप्रत्यहंकुर्यात्स्वाशिवैःसहमोदिनी निशायांप्रजपेन्मं
त्रंस्वयंत्रेशिवयोगतः वेष्पानांजपमात्रेन्तप्ररश्चरणमु
च्यते विपरीतांजपेन्मंत्रंसाकालीनात्रसंशयः योविता
मंत्रसिद्धिःस्याद्विपरीतरतौप्रिये विपरीतरतौजप्त्वासर्व
सम्पत्तिमालभेत् विपरीतरतौजप्त्वानिर्वाणपदवींव्रजे

त् विपरीतरतौजसाकालीवह्निहरेद्ध्रुवि विपरीत
रताकालीविपरीताविनारिणी विपरीताचयावेश्या
साकालीनात्रसंशयः योषिद्धियानसिध्यंतिविपरी
तरतिंविना विपरीतरतावेश्याविश्वलोकेषुपूजिता
गाढमालिंगनेदत्वाशुम्बयित्वापुनःपुनः कटाक्षेद
र्शयेद्यंत्रंदक्षिणाकौलिकीरिता एवंविधापरस्त्रीयां

स्त्री
७८

78

वेश्यायाश्चकुलेश्वरि एवंविधाभवेद्देश्यानवेश्याकु
लटाप्रिये कुलटासंगमाद्देविरौरवंनरकंव्रजेत् वीर
शक्तिर्भवेद्देश्यासाशास्त्रास्वस्वपायने पुरश्चर्याकृता
वेश्यायोजपेत्कुलस्नायने शिवलिंगगतासाधीशि
वलिंगगतासती शिवलिंगगतावेश्यासाधीसापरि
कीर्तिता योनिश्चजनिकामातालिंगश्चजनकःपिता

स्तनभावंपित्तभावमुभयोःपरिचिंतनं लिंगरूपोमहा
कालोयोनिरूपाचकालिका तयोर्योगंपरायन्यानतयो
र्योगपरोमहान् तयोर्योगःपरोधर्मःतयोर्योनःपरःस
वः स्वभैरवंविनावेश्यापाशिवपूजाकरोतियो रौरवेनर
केघोरेवसेदाहूतसंप्लवं स्वभैरवंविनावीरंमनसानैव
संस्मरेत् संस्मृत्वानरकंयातिमहाव्याधिपराभवेत् ना

श्री·
७५

79

नावीराश्रिनावेश्यापश्चवेश्याकुलेश्वरि सावेश्यानरके
यातिसत्यंसत्यंनसंशयः कामाद्वालोभतोवापियनाद्वो
वरवर्णिनि पशुसंगगतावेश्यारौरवंनरकंव्रजेत् नाना
वीराश्रितावेश्यापशुसंगरतापंचया वर्जनीयाप्रयत्ने
नकुलसाधनकर्मणि योज्याचेत्सिद्धिहानिःस्याद्दुष्टवे
श्याकुलार्चने रोगःशोकोभवेत्तस्यायनहानिःक्षणेन

ऐन स्मात्सर्वे प्रयत्नेन स्वशिवं च समाश्रयेत् जपह्
जादिकं वे श्यपा स्वशिवे परिकल्पयेत् पुष्पिताकामस
म्पन्ना सदा रमण तत्परका सर्वसिद्धिप्रदा वेश्या का
लिकारूपधारिणी पितृभूमिः समाख्याता सदाशि
वनिवासिनी शिवपवाशिवो ज्ञेयो लिंगरूपधरो यतः
शिवस्थानं श्मशानं स्थानं स्या च श्मशानं ऊलजा रहे

श्री॰
प॰
४०

ब्रह्मण्यां च चतुर्दश्यां पक्षयोरुभयोरपि स्मशाने नागते
नार्चैर्हीरश्चपशुवद्भवेत् तथ्यं ब्रह्मजितं येन सर्वैर्यंत्रैः प्र
पूजितं तत्र संपूज्य संजप्य निर्वाणपदवीं व्रजेत् मात
सुखेपितृसुखं दत्वा कालीं सनातनीं सर्वपापविनि
र्मुक्तो निर्वाणपदवीं व्रजेत् वेदेभ्यो जायते कर्मकर्म
णां बंधनं भवेत् वैदिकं कर्म सेत्यज्य स्मरणेषु सदा

जपेत् आगमोक्तपतिः शंभुरागमोक्तपतिर्गुरुः
स पतिः कुलजायाश्च नपतिश्च विवाहितः विवा
हितपतिस्त्यागी हृदयेणं नकुलार्चने विवाहितपतिं
नैवत्यजेद्वेदोक्तकर्मणि आगमोक्तपतिस्त्राताआ
गमोक्तपतिःशिवः सिद्धविद्यानसिद्धंतिआगमोक्त
पतिंविना आगमोक्तपतिर्देवियोषितांमोक्षदायकः

कालीनैवयजेयोषिदागमोक्तपतिंविना कुलजागु
रुवेदेविपतिनैवरणंचरेत् नदासागमवेश्यास्यात्कु
लजाचपतिंविना गमवेश्याभवेत्सैवकुलमार्गेप्रव
र्तिता कुलमार्गेप्रहन्नायासामुक्तानात्रसंशयः कु
लजागुरुवेदेवियदिपत्पत्काभवेत् परजवेनि
गमेश्याप्यथवाकुलीनाभवेत् शुक्रोत्सारणकाले

श्री·
८१

81

त्वनिर्वाणंविद्धिपार्वति तत्कालस्त्वमहाकालःकुल
मार्गप्रवेशिनां शुक्रोत्सारणकालेतुविज्ञापयतिसा
धकं कुलीनाप्रजपेन्मंत्रंजपांगेननिराकुलं शुक्रो
त्सारणकालेतुकायेनमनसापिवा शृंगभंगक्रमेण
वकुलीनायप्रकाशयेत् शुक्रोत्सारणकालस्यज्ञाप
नात्कालिकास्वयं जपांगैःकालिकादेवीमहाकालं

श्री॰
८२
82

विमोहयेत् ऊलीनाबलवेश्याचेनाल्पस्यतपसः फ
लं बहुनाजन्मनामंतेबलवेश्याप्रजीपयत् त्वत्स
माप्रकृतिः काचिद्यद्यस्तिभूमिमंडले नतथातत्स
माशक्तिस्विष्णुलोकेप्रविद्यते साचैर्वदक्षिणाकालीम
दनातुरविह्वला नस्याःशिवोमहाकालाः सत्यंसत्यं
नसंशयः षोडशाह्वायदासास्याकालीविक्रमतत्प

ण नारायञ्च दशमहाविद्या चेन्द्रचन्द्र दशमहाविद्या च सुन्दरी त्रयो
दशमहाविद्या चोन्मत्तदीक्षा ह्यादशमहाविद्या च भैरवी एतादृशप
शगणोपीत्वाब्रलवेश्याकुलेश्वरि महासाध्वीसमाख्या
नात्रिषुलोकेषुदुर्लभा स्वर्गेमर्त्ये च पाताले यायाति
ष्ठन्ति चांगना सर्वासामपि भर्त्ता च दिव्यो वीरश्च साधकः
योगी दिव्यो यदा वीरः सर्वनारीपतिर्भवेत् दिव्योपि

श्री·
८३

83

वीरभावेन सर्वज्ञात्मज्ञं वा यजेत् गंगवेश्या महावेश्या श्रयोध्या मथुरा श्रिये मायाच कुलवेश्या स्यान्महीद याच काशिका कांचीवराजवेश्या स्याद्देववेश्या श्रवं तिका द्वारावतीब्रह्मवेश्या सप्तैता मोक्षदायिकाः कुलीना भवती साक्षात्काली तारा सरस्वती कुलीना भैरवी राया कुलीना छिन्नमस्तका कुलीना सुंदरी देवी

ऊलीनामहिषमर्दिनी ऊलीनाभुवनाबालाऊलीना
बगलामुखी धूमावतीऊलीनाचमातंगीऊलीनाछि
ये ऊलीनाचान्नपूर्णास्यात्त्रिपुरात्वरितानथा पतिव्र
ताऊलीनाचसतीसाध्वीमहोदया ऊलीनामंत्रयंत्रा
णांसिद्धिदानात्रसंशयः ऊलीनादेवकन्याचऊलीना
योगिनीगणाः रंभोर्वशीरतीरामातिलोंत्तमाऊल

श्री·
८४
84

सुंदरी एताःसर्वाःपृथिव्यांचविहरंतिकुलात्मजाः कुल
जाकुलवेश्यायाःकुलधर्मपरायणा पशुभर्त्रीश्रितालो
लाकामकौतकलालसा कुलवर्त्मक्रमेणैवसाचसा
द्रमणोत्सुकाविदग्धावीरभावेनवीराराधनतत्परा
कुलजाकुलवेश्याचेद्वीरमेकंसमाश्रयेत् संत्यज्यप
शुभर्तारंकुलमार्गेप्रवेशयेत् कुलमार्गंसमाश्रित्य

वीरमेकंसमाश्रयेत् कुलमार्गेप्रवृत्ताचेत्पतिर्हि
नाभवेद्यदि कुलज्ञावाकुलीनावापरजन्मनिजाय
ते कुलधर्मरताप्राज्ञाकुलधर्मैककाथवा पूजा
र्हासामहेशानिपतिहीनांनपूजयेत् लोकाचारक्र
मेणैवपूजार्हालज्जितायदि तांविहायमहेशानि
कुलजांचप्रपूजयेत् कुलीनादर्शनेनैवसर्वपा

श्री॰
८५

85

पक्षयोभवेत् गंगास्नानमात्रेणयथापापक्षयोभवेत्
कुलज्ञाचकुलीनाचन्मंत्रतन्त्रफलप्रदा महावेश्या
भवेत्सैवसर्ववेश्याफलप्रदा यासांचसिद्धिविद्यानां
प्रशस्तायाकुलार्चने सैवशक्तिर्विशेषेणसर्ववेश्या
प्रकीर्तिता कुलज्ञानांप्रसूयीकुलीनाचकुलेश्व
रि सर्ववेश्याहीनजातौसर्वसिद्धिप्रदायिनी

विहितान्यां हीनजातां प्रजयेच्चवनीयतिः ब्रह्मचारी ग
हीवापिविहितान्यां नचार्चयेत् अर्चयेत्सिद्धिहानिः
स्याडःखं तस्यपदेपदे हीनजां विहितां रम्यां मनसा
चप्रपूजयेत् नयोगं चिंतयेद्धीमान् छिन्नमष्टोत्तरं
जपेत् जप्त्वाप्रणम्य देवेशि भक्त्याद्रव्यं निवेदयेत् का
माद्वालोभतो वापिहीनजांयदिगच्छति रौरवंनर

श्री
५८
86

कंयातिहीनजासंगमेनच हीनजासंगमेदेविमन
स्तानस्मरेत्कलौ कुलधर्मप्रसन्नोयःसमुक्तोनात्रसं
शयः कुलधर्मप्रसन्नायासामुक्तानात्रसंशयः अने
कजन्मनानंतेकुलधर्मेप्रवर्तते कुलधर्मेविनादेवि
नचमोक्षंप्रजायते कुलपूजांविनादेविकालीतारा
नसिद्ध्यति कुलपूजांविनादेविसुन्दरीनैवसिद्ध्य

त्ति कुलपूजां विना देवि पंचमी नैव सिद्ध्यति कुल
पूजां विना देवि भैरवी न व सिद्ध्यति कुलपूजां वि
ना देवि छिन्नमस्ता न सिद्ध्यति कुलपूजां विना दे
वि तत्वज्ञानं न जायते तत्वज्ञानं विना देवि निर्वा
णं नैव जायते निर्वाणश्रेयसं प्राप्य नस योगी प्र
वर्तते निर्वाणश्रेयसः प्राप्तिर्मूलं च कुलमंदिरं

श्री॰
८२
87

पंचमैपूजयेत्कालींकुलीनाकुलमंदिरे ब्रह्माविष्णु
श्चरुद्रश्चईश्वरश्चसदाशिवः इंद्रादिदशदिक्पाला
श्चादित्यादिनवग्रहाः असितांगाद्योयेयेभैरवाश्च
सुरादयः कुलपूजाकृताःसर्वैकृतार्थाःकुलिनागृ
हे शक्तिंविनामहेशानिशक्तिमंत्रेनसिद्ध्यति स
र्वेषांशक्तिःमंत्राणांशक्तिःसिद्धिप्रदायिनी नटी

कापालिकावेषधारजकीनार्पितांगना योगिनीस्वप
टीश्रोंडीम्लेंच्छनननयानथा गोपनीमालिनीरम्या
श्रासोकार्यप्रभेदतः चतुर्वर्णोद्भवानांच प्रोक्ताः से
न्नापकीर्तिताः पूजाद्रव्यसमालोकान्त्यगीतपरा
वय चतुर्वर्णोद्भवारम्यासमानटीपरिकीर्तिता पूजा
द्रव्यंसमालोकंसर्वज्ञांकृतेचया सर्ववर्णोद्भवा

श्री·
८८
88

रम्याकापालीमाप्रकीर्तिता पूजाद्रव्यंसमालोक्यवे
ष्णावढ्रंरुमिक्षुका सर्ववर्णोद्भवारम्यावेश्यासा
परिकीर्तिता पूजाद्रव्यंसमालोक्यरजोवस्त्रप्रका
शयेत् सर्ववर्णोद्भवारम्यारजकीसाप्रकीर्तिता पूजा
द्रव्यंसमालोक्ययंत्रसंस्कारतत्परा सर्ववर्णोद्भवार
म्यानापितस्यसुतास्मृता पूजाद्रव्यंसमालोक्यया

योगमाहरेत्स्वयं सर्ववर्णोद्भवी रम्या योगिनी साप्र
कीर्तिता प्रजाद्वयं समालोक्य कुलजा वीरमाश्रयेत्
सैत्यज्य पशुभर्तारं कर्म चंडालिनी स्मृता विपरीत
रता पत्न्ये पाया यित्रे पदृच्छति सर्ववर्णोद्भवा रम्या
शौंडी सा परिकीर्तिता सर्वदायं त्र संस्कारो यस्याश्च
परिजायते सैवम्भूमीद्दजा रम्या सर्ववर्णोद्भवा प्रिये

श्री· ८५

89

आत्मानंगोपयेयात्नसर्वदापशुसंकटे सर्ववर्णोद्भ
वारम्यागोपनीसाप्रकीर्त्तिता हृजाद्व्यसमालोक्य
यामालापरिनिर्मिता सर्ववर्णोद्भवारम्यामालिनी
साप्रकीर्त्तिता शाक्तभावेमहेशानितासांचकोचि
दाहरेत् संशोध्यपंचमंतत्वंतर्पयेत्कुलमंदिरे
श्रेंगुष्ठानामिकायोगाद्दामहस्तस्यपार्वति तर्पयेत्कालिकेंवीरः

साग्रपांसपरिवारकां ॥ग्रह्णेभैरवोदेवोनामिका

शक्तिरुच्यते शिवशक्तिमयायोगात्तर्पयेद्भोरदत्ति

णो तर्पणंत्रिविधंदेविश्रेष्ठंमध्यंकनीयसं श्रेष्ठं

चदिव्यभावस्यवीरभावस्यमध्यमं वानीयसंपशू

नांचकल्पदियंत्रेजलेक्रमात् इतिनिरुत्तरतंत्रेशिवशि

वासंवादेचतुर्दशः पटलः ॥ श्रीवीणीचारणाम्भोजे

श्री॰
९॰
१०

भक्तिरस्तुसदामम आचारसारतन्त्रेपञ्चमपटले
श्रीभगवानुवाच समयाष्टकंप्रवक्ष्यामिशृणुष्वैका
ग्रमानसः येनविज्ञानमात्रेणसिद्धोभवतिसाधकः
घातयेन्नोपयेन्नहन्तिंदयेन्नविलोकयेत् स्तुजयेन्ना
वयेच्चैवववर्जयेन्नजुगुप्सयेत् कामंक्रोधंचमात्सर्यं
विकारंचैंद्रियोद्भवं निद्रालज्जादौर्मनस्यंघातयेद

ष्टकं प्रिये मन्त्रमुद्रास्तत्त्वं च योगिनीवीरसंगमं भेर
वागमनाचारमेतत्सर्वं प्रगोपयेत् देवं गुरुं स्वरां वि
र्यां साधकं योषितं तथा शुभाशुभं कर्म चैव विंदयेत्
कदाचन कन्यायोनिं पशुक्रीडां नग्नां स्त्रीं प्रकटस्तनीं
मूनविग्रहक्लीवं च पापात्मा यो विलोकयेत् देवं गुरुं
तथा साधं ब्रह्मं किं चात्मानमव्ययं भक्तितः सकलाने

श्री ५२

९१

तान्पूजयेत्सुप्रयत्नतः गुरोर्वाक्योपदेशं च साधकैर्नी
तिदेवता स्वयमेवकुलाचारं सदा तत्त्वेन भावयेत् स्त्रा
गम्यागमनं चैव धूर्तगोष्ठीप्रवंचनं अन्त्यजे पापगोष्ठीं
च वर्जयेत्सिद्धिसाधकः विण्मूत्रं शोणितं क्लेदं हीनां
गोपिशितं सुरां कपालाहरणं चैव स्पृष्टो नैव वर्जय
येत् इत्येवं समयाचारं यः करोतीह साधकः संप्राप्य

देवीसद्भावं जीवन्मुक्तिं च गच्छति अनेन चीनाचारेण

त्वां समाराध्य साधकः यत्त्वन्यल्लभते वस्तु तन्नास्ति भु

वनत्रये द्वितीयपटले नारिणी दक्षिणाकालीनैव

चीनक्रमं विना महाचीनक्रमाचारपरः साधकसत्त

मः नारिणीं भजयन्विद्यां कुलकोटीः समुद्धरेत् नेदं

लिपिनरसस्य गाथां गायन्ति ते सदा अपि नः स्वकुले

श्री॰
९२

92

कश्चित्कलज्ञानीभविष्यति सयन्यःसचविज्ञानीसकविः
सचपंडितः सकुलीनःससुकृतीसधनीसचसाधकः स
ब्राह्मणःसवेदज्ञःसोग्निहोत्रीसश्रोत्रियः सतीर्थसेवीपी
ठेषुसन्निवासीससर्ववाः सब्रह्मीसोमपायीसयज्ञास्वी
सचवैमज्ञः सवैसवः सयौवश्वससौरःसचगाणपः स
ह्याचीनकर्मातार्चारेस्तारिणीयःसमर्चयेत् सविदासव

योर्मध्येमहाविदेवगरीयसी भक्तिनायांचज्ञानायांसिद्ध
योबोधस्वरूपिणी स्वसमाविदज्ञस्थूलिनीविजयासंविदेऊ
रा वैसवीतुलसीतंगातेजोवल्लीरमेश्वरी विमर्षाहे
तुरत्नाचदेवीलक्ष्मीर्महोदरी समयामोहिनीगौरीसि
द्धिमूलीमहोदरी मातुलानीसिद्धिरूपासिद्धविद्यासर
स्वती वाग्वादिनीसदानंदाश्वानंदापददायिनी यानि

श्री॰
५५
93

चैतानिनामानिमेवयोस्सिद्धिमूलिकांसमाप्नोति पंरंवि
द्यांभुक्तिर्मुक्तिश्चजायते सामर्थ्यंरहितेहैयेकथंकर्माणि
कारयेत् विनापिसमयांपूजाऊज्ञापिनश्चभोदया ब्राह्मे
मुहूर्तेचोस्यायभक्तितःपापनाशिनी तथासूर्योदयेजा
तेमध्येद्भमहितानातथा तथापराह्नसमयेविहरेत्पाप
नाशिनी प्रईराजेविशेषेणवांछितार्थफलप्रदा वि

नापिसमयादेविजपपूजादिकंकथं नैवसिद्धिम
वाप्नोतिअभिचारायकल्पते अपमृत्युहरांनूनंरोग
शोकविनाशिनीं दुष्टशत्रुप्रशमनीसर्वलोकातुरं
जिनीं सिद्धयोह्यनिमाद्यास्तुतस्यहस्तेव्यवस्थितः
कापकेवाचिकंचापिमानसंचापिदुष्कृतं पतन्तिसर्वं
स्तयंयानिब्रह्महत्यादिकंतथा सशिवःसचयोगी

श्री॰
५४

९५

शः सच मुक्तः स्यात्तीनथा सएव विस्रः समुक्तः समया येनपालिता समयाभक्षिनायेन समयाराधिनातथा समयापालितायेनसमुक्तः सर्वपानकै भक्षयित्वा चसमयोयंमंत्रंजपेन्नरः सम्यक्फलसवाप्नोतिसत्य सत्यंवरानने विनापिसमयांदेवि मंत्रंजपतिनित्य शः स्वल्पायुः सभवेत्सयोदेवताकोपयेद्धवं स्मानं

देनविनाभ्रंशोनहित्यंतिदेवताः इत्थंशुद्ध्यादिकं
सर्वमानंदार्थंविभावयेत् आनंदेजायतेमानेत्वभ
क्तेनैवकदाचन अतिपानाभवेन्मंत्रोजपपूजादिनि
ष्फलं बुद्धिनाशोभवेद्देविस्मात्पवमितंचरेत् सर्वा
र्थेभक्तयेतैवपापदस्यपदेपदे अतिसंतोभनोदुःखं
लोकनिंदाचजायते इत्येवंसमयाचारःकथितस्य

श्री॰
९५

95

वरानने इदिर्नीशोयनार्थंच मंत्रं शृणु महेश्वरि अथ
सर्वविघ्नोपशमनं ॐ संविदे ब्रह्मसंभूते ब्रह्मपुत्रि सदान
घे भैरवाणां च तत्वस्यार्थे पवित्रा भव सर्वदा ॐ ब्राह्मण्यै
नमः स्वाहा ॐ सिद्धिमूलप्रिये देवि हीनबोधप्रबोधि
नि राजाप्रजावशंकरि शत्रुकंठत्रिशूलिनि ॐ ऐं ह्रां
यायै नमः स्वाहा ॐ अज्ञानेन्धनदीप्ताग्रे ज्वालाग्रेस्ता

तद्रूपिणि आनंदस्याद्भुतिश्रीतिंसम्यग्ज्ञानंप्रयच्छमे
ॐह्रींवैष्णायैनमःस्वाहा ॐनमःस्वामिनमः स्वामि
योगमार्गप्रदर्शिनि त्रैलोक्यविजयोमातःसमादिफ
लदाभव ॐक्लींसूक्ष्मायैनमःस्वाहा ॐअमृतेअमृतोद्भ
वे अमृतवर्षिणिअमृतमाकर्षयअमृतमाकर्षयसि
द्धिंदेहि अमुकंमेवशमानयस्वाहा अथसंविनामा

श्री· ५८

नि त्रैलोक्यविजया सिद्धा सिद्धिदा सिद्धिमूलिका ज्ञानं से

विन्संविदां चक्षणमाभंगारमालया योगदा योगसंसेव्या

योगमार्गप्रकाशिनी ब्रह्माणी ब्रह्मसंभूता ब्रह्मानन्द

प्रदायिनी वाग्देवता वशकरी विजया विजयप्रदा स

माधिवरदा ज्ञाननाशानी त्येकविंशतिः श्वेतरक्तपीत

कृष्णप्रभेदाच्चतुर्विधा ब्राह्मणी श्वेतप्रख्या च क्षत्रि

९८

यारक्तपुष्पिका पीतपुष्पाचवैसर्पसाक्षुद्राचकृष्णपुष्पि
का दुग्धयोगेनविजयाकेवलानंदवर्द्धिनी महातेज
स्करीवह्निदोषादिविनिवारिणी सापुनर्जलयोगेनस
र्वांजीर्णविनाशिनी घृतेनमेधामायत्तेवाग्देवीवश
कारिणी प्रतिभामुत्तमांयत्तेधीषणांचातिनिर्मलां
काशदोषानशेषांश्चमधुनासहनाशयेत् सैंधवेनम

श्री· ९७

हावह्निवदास्यालवणेनच शितयाप्यगडेनापिशूलाम्ल
पित्तनाशिनी अतिसारोपशमनीश्वासकाशप्रमर्दिनी
शामवातसमुद्भूतग्रहणीवाविनिवारिणी सर्वैर्वामय
रैर्युक्तासर्वामयविनाशिनी ज्ञानविज्ञानदायिणिपशूल
मार्गप्रकाशिनी बहुनात्रकिमुक्तेनकेवलाचित्स्व
रूपिणी प्रकाशितातवस्नेहात्सर्वतं ॥

त्रह्यगोपिता मंविदासवयोर्मध्येसंविदेवगरीयसी
संवित्त्रयोगस्तेनेहकर्तव्यःसाधकोत्तमैः एककालेद्वि
कालंवात्रिकालेपंचकालकं तोलकंवातदर्द्धंवातोल
कद्वयमेववा नचन्यूनाधिकामात्रायथाचरतिनिम्नगाः
न्यूनाधिकायांमात्रायांफलतत्त्वनजायते तस्मात्प्रमाण
मात्राहिकर्तव्यासिद्धिमिच्छता तारातंत्रेतृतीयपटले

श्री
५८

९४

संविदानंदयोगेनयःकारणमदोभवेत् सएवपरमा
नंदोब्रह्मसायुज्यदायकः तस्माद्धकारसिद्धिमूलिंऊली
नःकारणंपिवेत् विनानंदंसंविदायाःपानंयत्कारण
स्यच तत्तनानंदजनकंऊडदेववचोयथा दृष्टिमानस
वाककायैर्यावत्रभवतिभ्रमः तावत्पानंप्रकुर्वीतप
शुपानमतःपरं ॥ नयनाग्निबाणसंख्या

कर्षस्तुपरमेश्वरि मद्यपात्रंप्रकर्त्तव्यंममितेनकदाच
न मद्याभावेनाम्रपात्रेगव्यंदद्याद्धूतंविना अथवाविनरे
नाम्रेमधुपुष्परसोद्भवं नारिकेलोदकंदद्यात्काश्यपपा
त्रेथवाद्विजः मांसाभावेतुलशुनेपिण्याकंलवणार्द्रकं
गोधूमंहंसडिंबंवाशुद्धतैलेनभर्जितं माषंवादितरेत्सं
ध्रीमूलमंत्रेणमंत्रितं मीनाभावेतुकूष्मांडंस्तुदद्यंस्तुप

श्री॰
५५

११

रिस्कृतं जंबीरं रक्तशाकं वाम्रपक्वं दिनिवेदयेत् दिव्यं देव्या

यतः पानं वीरं वीरासनस्थितं संस्काररहितं पानं पशुपा

नं नगद्यते यत्पाने हृष्यणं प्रोक्तं प्रायश्चित्तं न देवहि श्रेष्ठे

ष्वर्यं परं मोहं मंत्री संस्कृतपानतः दीपनाशे च घटे भग्ने पा

त्रे वा पतिते भुवि ॥ सप्ताहे च कृते पाने श्री चक्रं का

रयेद्बुधः ज्ञानतंत्रे द्वितीयपटले ॥ देव

त्वाग्रहमंत्राणामैकंकृत्वाजपेन्नयः अर्थंतुहृदिसंपविश्येद्
तस्यासिद्धोभवेन्मंत्रः अनन्यज्ञानवान्भूत्वागुरोराज्ञास
विश्वसेत् विश्वंचमंत्रदेवंचआत्मानंदेवतोपमं भूत्वा
सदाजपेद्यस्तुतस्यासिद्धोभवेन्मंत्रः ध्यानोक्तमूर्तिमंत्रं
चएकभावेनयोजयेत् तस्यैवमंत्रसिद्धिस्तुजायतेहि
जपुंगव चराचरंब्रह्ममयंयःपश्येत्साधकोत्तमः नी

चोन्नमसमंज्ञानंमेध्यामेध्येनतथापुनः आत्मतत्वंजगात्स
र्वंसर्वंशिवमयंतथा तेनविप्रेंद्रमुक्तःस्यात्सत्यंसत्यं
नसंशयः नारदउवाच कृतमयात्मकोदेवप्रणवस्तव
वक्त्रतः उच्चार्यमाणोदेवेशनादःकस्मादुपस्थितः शि
वउवाच नमायारहितंब्रह्मकिंचित्कर्तुंहिशक्यते निरा
कारेनिराकारासाकारेप्रकृतिःपरा तयोर्भेदोनक

न्दियो यदीच्छेदात्मनोहितं नादेनबिंदुविप्रेंद्रमकारस्या
न्नुतोविभुः ब्रणवंब्रम्लरूपंहिस्मरेच्छन्नयात्मकंद्विज
शिवउवाच यथातुब्रम्लणोविप्रतथादेवचराचरं त
थैवप्रणवाज्ज्ञानामंत्राःसर्वेद्विजोत्तम वियद्वतुयथा
ब्रम्लतथैवप्रणवोद्विज विंदुरेवविसर्गःस्याद्ब्रम्लैवकृ
तिर्यथा स्वस्वकर्मसमादायप्रकृतिर्जीवरूपधृक् त

श्री· २९
101

ष्यैवणवोविप्रनामामेवंमन्तुर्भवेत् मंत्रदेवतयोरेव
नास्तिभेदःकदाचन यथाबलतथाशक्तिर्यथामंत्रस्त
थाध्रुवः तेषांभेदंहिविप्रेंद्रसत्यंसत्यंनकल्पयेत् सर्वे
षांकारणंशक्तिरिंद्रादीनांचक्रमेह कर्मणायेनये
नैवदेवादीनांलयोभवेत् तेनतेनैवविप्रेंद्रसर्वेदे
वादयोनराः कीटादयोपिप्रकृतौवसंत्ये ॥

वनसंश्रयः ब्रह्मणएवनथाशक्तिःसृष्ट्यादौचतथाश्रुते
पुनरावर्त्तयस्तेषांस्वस्वकर्मसमाश्रिताः मायापिश्राम
येत्सर्वंयथायंत्रीचयंत्रकं मायापिमुक्तिमार्गस्यविस्ते
यापरिपंथिनी सात्वष्टाचजगद्धात्रीमुक्तिदात्रीनसंश्र
यः निराकारात्तसाशक्तिर्ब्रह्मरूपासनातनी निराकार
स्यैककलासृष्ट्यैवैविनिःसृताः नथैवब्रह्मणोविष्ण

श्री·
१०२

102

सापिदेवीकलैकया विष्ण्वादयोपिनस्मावैब्रह्मणोपिष्ट
पकष्टथक तस्याथापरमायांवैमुक्तिमार्गप्रदायिनी ग्र
स्तायांभूमिदात्रीमामुक्तिमार्गविरोधिनी तस्मादादौद्विज
श्रेष्ठतांमायांवशमानयेत् शास्त्रोक्तविहितंकर्मयदिका
म्यंनकारयेत् प्रीतयेदेवदेवस्यतत्रमायानबंध
दा श्रीनारदउवाच यदिज्ञानात्मनंप्रणपेमत्ता

नात्कलत्रं कृतं तयोर्भोगो भवेत्केन एकदा हरनायक
शिव उवाच एकदा न भवेद्भोगः पुण्यपापानकस्य च श्रा
द्धे कृतं महत्पापं पुण्येन स्वर्गमाप्नुयात् तदा पुण्यभोक्ता
सप्रथ्यं मे द्विजसत्तम पुण्यावसाने पापस्य भोक्ता स्यात्तत
मानवः एवं पापेन म्रियतेन तयोर्भोगः क्रमाद्भवेत् नारद
उवाच राम सुकृत्यजेत्प्राणान्काश्यां वा मरणं भवेत्

स्त्री॰
१०३

103

ज्ञानगंगाभवेद्यस्यमम्स्वर्वाङ्गफघोजमे मुक्तिदेशचद्देवे
ऋतीर्थेषेवस्वरोजम दंडंगृहीत्वायोविप्रोम्रियतेयत्र
कुत्रचित् संन्यासिनोहिदेवेशावानप्रस्थाथिकेतथा श्र
न्येषांज्ञानिनांदेवकोभोक्ताकलुषस्यच शिवउवाच द्व
त्रेतीर्थेचमरणेरामादिनामकोतथा कायस्याङ्गवेन्म
क्तिदिग्दंडाभ्यंतरेद्विज नैनैवजायतेनाशः ॥

पापस्यकलुषस्यच ज्ञानीप्रथमकल्पस्यपापभोक्ता
भवेन्नहि ज्ञानेप्राप्यतमेविप्रपापंदेहात्स्थरभवेत्
भ्रमनेवायुरूपेणप्राप्यवंतंनचस्पृशेत् ज्ञानयोगेन
विप्रेंद्रलिंगदेहंप्रणाशये लिंगदेहेहृतेनाशेमर
णालीयतेविभौ आत्मनेतन्मयंकृत्वासोहंभावेनस
र्वदा विचरेद्द्विजशार्दूलस्वात्मानंपरितोषयेत् स

श्री·
१०४
104

वंवलमयंपश्यन्जीवन्मुक्तोभवेन्नरः नमो[illegible]वपाप
उण्यानिसर्वयांनिनदाहिज पुनर्जन्माहिजश्रेष्ठसत्य
सत्यंनविद्यते इतिश्रीज्ञानानन्दसंहितोपटलाकृतिप
यस्तोकालिखिताः ॥ संवत् १९ ४७ जिपट पु १९
लिखितं नौनकौल ॥ समाप्तम् ॥

नं० ५५६८-घ

ज्ञान तन्त्रस्य द्वितीयं पटलम् (तन्त्राम्)

पत्राणि १०४ (सम्पूर्णम्)

ले० तोतकौल संवत् १६४६